श्रेष्ठि देवचन्द्र लालभाई जैनपुस्तकोद्धारे ग्रन्थाङ्कः ९२.

परमार्हतकुमारपालप्रतिबोधक-कलिकाल-
सर्वज्ञश्रीमद्हेमचन्द्राचार्यविरचितः-

श्रीअभिधानचिन्तामणिकोशः।

तैरेव विरचितैः, (२) लिङ्गानुशासन, (३) शेषनाममाला,
(४) निघण्टुशेषैः सुधाकुशलविरचितया एकाक्षर-
नाममालया, (५) जिनदेवसूरिसंदब्धेन
नाममालाशिलोञ्छेन च सनाथः।

अभिधानचिन्तामणिगतशब्दानामकाराद्यनुक्रमेण
शब्दानुक्रमणिकया चालङ्कृतः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेष्ठि देवचन्द्र लालभाइ जैनपुस्तकोद्धारे ग्रन्थाङ्कः ९२.

परमार्हतकुमारपालभूपालप्रतिबोधक-कलिकाल-
सर्वज्ञश्रीमद्हेमचन्द्राचार्यविरचितः-

श्रीअभिधानचिन्तामणिकोशः ।

तैरेव विरचितैः, (१) लिङ्गानुशासन, (२) शेषनाममाला,
(३) निघण्टुशेषैः सुधाकुशलविरचितया एकाक्षर-
नाममालया, जिनदेवसूरिसंदृब्धेन नाममाला-
शिलोञ्छेन च सनाथः ।

अभिधानचिन्तामणिगतशब्दानामकाराद्यनुक्रमेण
शब्दानुक्रमणिकया चालङ्कृतः ।

प्रकाशकौ—

हीराचन्द कस्तुरचन्द जवेरी
मोतीचंद मगनभाई चोकसी
श्रेष्ठि देवचन्द्र लालभाइ जैनपुस्तकोद्धारसंस्थायाः
कार्यवाहकौ—

वि० सं० २००२ वीरात्. २४७२ खिस्ताब्दं. १९४६

प्रथमसंस्करणम्] मूल्य ४ रूप्यकाः । [प्रतयः १२५०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Printed by Ramchandra Yesu Shedge
at the Nirnaya-Sagar Press, 26–28,
Kolbhat Street, Bombay.

Published by Hirachand Kasturchand Jhaveri
& Motichand Maganbhai Choksi, Managing
Trustees of Sheth Devchand Lalbhai
Jain P. Fund, Gopipura, Surat.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राक्कथन

श्रीमद् हेमचन्द्राचार्यनी कीर्तिगाथानुं वर्णन करवुं एटले सर्वमान्य सोनापर ढोळ चढाववा बराबर छे. तेमनुं व्यक्तित्व, प्रतिभा, विद्वत्ता तथा सर्वतोमुखी शक्ति एटली जगजाहेर छे के जैनज नहि पण अजैनोमां ये भाग्येज कोई हिंदी संस्कृतिनो विद्वान हशे जे श्री. हेमचन्द्राचार्यनी यश-गाथाथी अजाण हशे. "गुजरातना ज्योतिर्धर" थी मांडी "कलिकालसर्वज्ञ" तरीकेनी एमनी कीर्ति ए वस्तुनी शाख पूरे छे.

तेओश्री एक महान जैनाचार्य होवा छतां तेओनी साहित्य-विषयक प्रवृत्ति सर्व क्षेत्रोमां प्रसरेली हती. काव्य, छंद, व्याकरण, कोश तथा गूढ तत्वज्ञान वगेरे विषयो तेमने हस्तामलकवत् हता. सिद्धराज जयसिंह तथा कुमारपाळ जेवा प्रतापी गूर्जर नरेशोपर तेमनो अप्रतिम प्रभाव तेमनी बुद्धि तेजस्विता तेमज प्रतिष्ठा बतावे छे. एवा महापुरुषनी एक अद्वितीय कृति जनसमाज समक्ष मुकतां अमने आनंद थाय छे.

श्रीअभिधानचिंतामणि कोशनी महत्ता तेमज उपयोगिताने रूपरेखा दोरवी ए झवेरी आगळ झवेरातनुं वर्णन करवा बराबर छे. विद्वद्वर्ग आ अणमोल झवेरातने सारी रीते ओळखे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आ संस्था तरफथी आनुं प्रकटीकरण वर्षो पूर्वे हाथ धरवामां आव्युं हतुं अने तेमनुं संशोधन कार्य श्रीमत् सागरानंदसूरीश्वरजी हस्तक थयुं छे. जे भूलोनी परंपराने लीधे शुद्धिपत्रक मुकवुं पड्युं छे ए प्रेसना अनभिज्ञ काम करनाराओनी साक्षी पूरे छे. आ कृतिनो अमुक मोटो भाग मुंबई बहारना प्रेसमां छपायो छे अने तेनी बेकालजी तथा प्रिन्टिंग तरत जणाई जाय एवां छे. अस्तु. संस्था आटला समय बाद पण आ पुस्तकने प्रगट करवा भाग्यशाळी थाय छे ते ओछो आनंदनो विषय नथी.

आ पुस्तकना प्रकटीकरणमां सहाय करनारा सर्वेनो संस्था तरफथी अमे आभार मानीए छीए.

ली० सेवको

मुंबई, ता० १५-१२-४५
सं. २००२, मौन एकादशी.

हीराचंद कस्तुरचंद झवेरी.
मोतीचंद मगनभाई चोकसी.
मेनेजिंग ट्रस्टीओ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिधानचिन्तामणे विषयक्रमः ।

नाम	श्लोकाः पत्राणि
१ लिङ्गानुशासनम्	१–२०
२ एकाक्षरकोषः	१–१६
३ अभिधानचिन्तामणिः	१–२०४
१ देवाधिदेवकाण्डः	१–१३
२ देवकाण्डः	१४–४७
३ मर्त्यकाण्डः	४८–१२७
४ तिर्यक्काण्डः	१२७–१८२
५ नरककाण्डः	१८२–१८३
६ सामान्यकाण्डः	१८३–२०४
४ शेषनाममाला	२०५–२२८
५ नाममालाशिलोञ्छः	२२९–२४६
६ निघंटुशेषः	२४७–२८६
७ अभिधानचिन्तामणिकोशस्य अकारादिवर्णानुक्रमेण शब्दानुक्रमणिका	१–४४०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेष्ठी देवचन्द लालभाई जव्हेरी.



जन्म १९०९ वैक्रमाब्दे
कार्तिकशुक्लैकादश्याम्
(देवदीपावली–सोमवासरे)
सूर्यपूरे.

निर्याणम् १९६२ वैक्रमाब्दे
पौषकृष्णतृतीयायाम्
(मकरसङ्क्रान्तिमन्दवासरे)
मुम्बय्याम्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीसर्वज्ञाय नमः ।

अभिधानचिन्तामणौ

देवाधिदेवकाण्डः प्रथमः ।

प्रणिपत्यार्हतः सिद्धसाङ्गशब्दानुशासनः ।
रूढयौगिकमिश्राणां, नाम्नां मालां तनोम्यहम् ॥१॥

व्युत्पत्तिरहिताः शब्दा, रूढा आखण्डलादयः ।
योगोऽन्वयः स तु गुणक्रियासम्बन्धसम्भवः ॥२॥

गुणतो नीलकण्ठाद्याः, क्रियातः स्रष्टृसन्निभाः ।
स्वस्वामित्वादिसम्बन्धस्तत्राहुर्नाम तद्वताम् ॥३॥

स्वात् पाल-धन-भुग्-नेतृ-पति-मत्वर्थकादयः ।
भूपालो भधनो भूभुग्, भ्नेता भूपतिस्तथा ॥४॥

भूमांश्चेति कविरूढ्या, ज्ञेयोदाहारणावली ।
जन्यात्कृत्-कर्तृ-सृट्-स्रष्टृ-विधातृ-कर-सू-समाः ॥५॥

---

१ जन्यात्-कार्यात् यथा विश्वकृत् विश्वकर्ता विश्वसृट् विश्वस्रष्टा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जैनकाद् योनि-ज-रुह-जन्म-भू-सूत्यणादयः ।
धैर्य्यात् ध्वजा-ऽस्त्र-पाण्यऽङ्क-मौलि-भूषण-भृन्निभाः ॥६॥
शालि-शेखर-मत्वर्थ-मालि-भर्त्तृ-धरा अपि ।
भोज्याद्यैं भुग-ऽन्धो-व्रत-लिट्-पायि-पा-ऽशा-ऽशनाऽऽदयः ॥७
पत्युः कान्ता-प्रियतमा-वधू-प्रणयिनी-निभाः ।
कलत्राद् वर-रमण-प्रणयीश-प्रियादयः ॥८॥
सख्युंः सखिसमा वाह्याद्यैं, गामि-याना-ऽऽसनादयः ।
ज्ञातेः स्वसृ-दुहित्रा-ऽऽत्मजा-ऽग्रजा-ऽवरजाऽऽदयः ॥९॥
आश्रयात्सद्मपर्य्याय-शय-वासि-सदाऽऽदयः ।
वध्यांद् भिद्-द्वेषि-जिद्-घाति-ध्रुग-ऽरि-ध्वंसि-शासनाः॥१०
अप्य-ऽन्तकारि-दमन-दर्प्पच्छिद्-मथनाऽऽदयः ।
विवक्षितो हि सम्बन्ध, एकतोऽपि पदात्ततः ॥११॥

विश्वविधाता विश्वकरः विश्वसृः ब्रह्मा, अत्र समशब्द आद्यर्थः, तेन विश्वकारकः विश्वजनक इत्याद्यपि कविरूढ्यैव । २ यथा आत्मयोनिः आत्मज इत्यादि । ३ यथा वृषभध्वजः शूलास्त्र इत्यादि । ४ यथा मधुभुक् मध्वंध इत्यादि । ५ यथा नीलकण्ठसखः इत्यादि । ६ यथा वृषगामी वृषयानः इत्यादि । ७ यथा यमस्वसा इत्यादि । ८ यथा शुसद्मा शुशयः इत्यादि । ९ यथा पुरभिद् पुरद्वेषी इत्यादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राक्प्रदर्शितसंबन्धिशब्दा योज्या यथोचितम् ।
दृश्यते खलु वाह्यत्वे, वृषस्य वृषवाहनः ॥१३॥

स्वत्वे पुनर्वृषपतिर्वार्य्यत्वे वृषलांछनः ।
अंशोर्वार्यत्वेऽंशुमाली स्वत्वेऽंशुपतिरंशुमान् ॥१३॥

वध्यत्वेऽहेरहिरिपुर्भोज्यत्वे चाहिभुक् शिखी ।
चिह्नैर्व्यक्तैर्भवेद्व्यक्तेर्ज्जातिशब्दोऽपि वाचकः ॥१४॥

तथा ह्यगस्तिपूता दिग् , दक्षिणाशा निगद्यते ।
अयुग्-विषमशब्दौ त्रि-पञ्च-सप्तादिवाचकौ ॥१५॥

त्रेनेत्रपञ्चेषुसप्तपलाशादिषु योजयेत् ।
गुणशब्दो विरोध्यर्थे, नञादिरितरोत्तरः ॥१६॥

अभिवक्ते यथा कृष्णः, स्यादसितः सितेतरः ।
वार्द्ध्यादिषु पदे पूर्वे, वाडवाग्न्यादिषूत्तरे ॥१७॥

द्वयेऽपि भूभृदाद्येषु, पर्य्यायपरिवर्तनम् ।
एवं परावृत्तिसहा, योगात् स्युरिति यौगिकाः१७ ॥१८॥

मिश्राः पुनः परावृत्त्यसहा गीर्वाणसन्निभाः ।
प्रवक्ष्यन्तेऽत्र लिङ्गं तु, ज्ञेयं लिङ्गानुशासनात् ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवाधिदेवाः प्रथमे, काण्डे देवा द्वितीयके ।
नरास्तृतीये तिर्यञ्चस्तुर्य एकेन्द्रियादयः ॥२०॥
एकेन्द्रियाः पृथिव्यम्बुतेजोवायुमहीरुहः ।
कृमिपीलकलूताद्याः, स्युर्द्वित्रिचतुरिन्द्रियाः ॥२१॥
पञ्चेन्द्रियाश्चेभकेकिमत्स्याद्याः स्थलखाम्बुगाः ।
पञ्चेन्द्रिया एव देवा, नरा नैरयिका अपि ॥२२॥
नारकाः पञ्चमे साङ्गाः, षष्ठे साधारणाः स्फुटम् ।
प्रस्तोष्यन्तेऽव्ययाश्चात्र, त्वन्ताद्यादी न पूर्वगौ ॥२३॥

अर्हन्[1] जिनः[2] पारगतस्त्रिकालवित्[3]
क्षीणाष्टकर्मा[4] परमेष्ठ्यधीश्वरः[5] ।
शम्भुः[6] स्वयम्भूर्भगवान्[7] जगत्प्रभुः[8]-
स्तीर्थङ्करस्तीर्थकरो[9] जिनेश्वरः[10] ॥२४॥

स्याद्वाद्यभयदसार्वः[11] सर्वज्ञः[12] सर्वदर्शिकेवलिनौ[13] ।
देवाधिदेवबोधिदपुरुषोत्तमवीतरागाप्ताः[14] ॥२५॥
एतस्यामवसर्पिण्यामृषभोऽजितशम्भवौ ।
अभिनन्दनः सुमतिस्ततः पद्मप्रभाभिधः ॥४६॥
सुपार्श्वश्चन्द्रप्रभश्च, सुविधिश्चाथ शीतलः ।
श्रेयांसो वासुपूज्यश्च, विमलोऽनन्ततीर्थकृत् ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मः[१५] शान्तिः[१६] कुन्थुररो[१७], मल्लिश्च[१८] मुनिसुव्रतः[१९]।
नमिर्नेमिः[२०] पार्श्वो[२१] वीरश्चतुर्विंशतिरर्हताम्[२२] ॥२८॥
ऋषभो[१] वृषभः[२] श्रेयान्[३] श्रेयांसः[४] स्यादनन्तजिदनन्तः[५]।
सुविधिस्तु[१] पुष्पदन्तो[२] मुनिसुव्रतसुव्रतौ[१] तुल्यौ[२] ॥२९॥
अरिष्टनेमिस्तु[१] नेमिर्वीरश्चरमतीर्थकृत्[२]।
महावीरो वर्द्धमानो[१], देवार्य्यो ज्ञातनन्दनः[२] ॥३०॥
गणा नवाऽस्यर्षिसङ्घा, एकादश गणाधिपाः।
इन्द्रभूतिरग्निभूतिर्वायुभूतिश्च[३] गौतमाः ॥३१॥
व्यक्तः[४] सुधर्मा मण्डितमौर्यपुत्रौ[५] कम्पितः[६]।
अचलभ्राता[७] मेतार्यः[८], प्रभासश्च[९] पृथक्कुलाः ॥३२॥
केवली चरमो जम्बूस्वाम्यऽथ[१] प्रभवः[२] प्रभुः।
शय्यम्भवो यशोभद्रः[३], सम्भूतविजयस्ततः[४] ॥३३॥
भद्रबाहुः[५] स्थूलभद्रः[६], श्रुतकेवलिनो हि षट्।
महागिरिसुहस्त्याद्या[७], वज्रान्ता[८] दशपूर्विणः ॥३४॥
इक्ष्वाकुकुलसम्भूता, स्याद् द्वाविंशतिरर्हताम्।
मुनिसुव्रतनेमी तु, हरिवंशसमुद्भवौ ॥३५॥
नाभिश्च[१] जितशत्रुश्च[२], जितारिश्च[३] संवरः[४]।
मेघो धरः[५] प्रतिष्ठश्च[६], महासेनो नरेश्वरः ॥३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुग्रीवश्चं दृढरथो, विष्णुश्चं वसुपूज्यराट् ।
कृतवर्म्मा सिंहसेनो[14], भानुश्चं विश्वसेनराट् ॥३७॥
सूरः सुदर्शनः कुम्भः, सुमित्रो[20] विजयस्तथा ।
समुद्रविजयश्चाश्वसेनः सिद्धार्थ एव च ॥३८॥
मरुदेवा विजया सेना सिद्धार्था च मङ्गला ।
ततः सुसीमा पृथ्वी, लक्ष्मणा रामा ततः परम् ॥३९॥
नन्दा विष्णुर्जया श्यामा, सुयशाः सुव्रता चिरा ।
श्रीर्देवी प्रभावती च, पद्मा वप्रा शिवा तथा ॥४०॥
वामा त्रिशलाँ क्रमतः, पितरो मातरोऽर्हताम् ।
स्याद्गोमुखो महायक्षस्त्रिमुखो यक्षनायकः ॥४१॥
तुम्बरुः सुमुखश्चापि, मातङ्गो विजयोऽजितः ।
ब्रह्मा यक्षेट् कुमारेः षण्मुखपातालकिन्नराः ॥४२॥
गरुडो गन्धर्वो यक्षेट्, कुबेरो वरुणोऽपि च ।
भृकुटिर्गोमेधः पार्श्वो, मातङ्गोऽर्हदुपासकाः ॥४३॥
चक्रेश्वर्यजितबला, दुरितारिश्च कालिका ।
महाकाली श्यामा शान्ता, भृकुटिश्च सुतारका ॥४४॥
अशोका मानवी चण्डा, विदिता चाङ्कुशा तथा ।
कन्दर्पा निर्वाणी[16] बला, धारिणी[18] धरणप्रिया ॥४५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नरदत्ताऽथ[२०] गान्धार्य्यम्बिके[२१] पद्मावती[२२] तथा ।
सिद्धायिके[२३] चेति जैन्यः, क्रमाच्छासनदेवताः ॥४६॥
वृषो[१] गजोऽश्वः[२] प्लवगः[३], क्रौञ्चोऽब्जं[४] स्वस्तिकः[५] शशी ।
मकरः[६] श्रीवत्सः[७] खड्गी[८], महिषः[९] शूकरस्तथा ॥४७॥
श्येनो[१०] वज्रं[११] मृगः[१२] छागो[१३], नन्द्यावर्त्तो[१४] घटोऽपि च ।
कूर्मो[१५] नीलोत्पलं[१६] शङ्खः[१७], फणी[१८] सिंहोऽर्हतां ध्वजाः ॥४८॥

रक्तौ च पद्मप्रभवासुपूज्यौ,
शुक्लौ च चन्द्रप्रभपुष्पदन्तौ ।
कृष्णौ पुनर्नेमिमुनी विनीलौ,
श्रीमल्लिपार्श्वौ कनकत्विषोऽन्ये ॥४९॥

उत्सर्पिण्यामतीतायां, चतुर्विंशतिरर्हताम् ।
केवलज्ञानी निर्वाणी सागरोऽथ महायशाः[२] ॥५०॥
विमलः[३] सर्वानुभूतिः[४], श्रीधरो दत्ततीर्थकृत्[५] ।
दामोदरः[६] सुतेजाश्च[७], स्वाम्यथो मुनिसुव्रतः[८] ॥५१॥
सुमतिः[९] शिवगतिश्चैवाऽस्तागोऽथ निमीश्वरः[१०] ।
अनिलो यशोधराख्यः[११], कृतार्थोऽथ जिनेश्वरः[१२] ॥५२॥
शुद्धमतिः[१३] शिवकरः[१४], स्यन्दनश्चाथ सम्प्रतिः[१५] ।
भाविन्यान्तु पद्मनाभः[१], सूरदेवः सुपार्श्वकः[२] ॥५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वयंप्रभश्च सर्वानुभूतिर्देवश्रुतोदयौ ।
पेढालः पोट्टिलश्चापि, शतकीर्तिश्च सुव्रतः ॥९४॥
अममो निष्कषायश्च, निष्पुलाकोऽथ निर्ममः ।
चित्रगुप्तः समाधिश्च, संवरश्च यशोधरः ॥९५॥
विजयो मल्लदेवौ च चानन्तवीर्यश्च भद्रकृत् ।
एवं सर्वावसर्प्पिण्युत्सर्प्पिणीषु जिनोत्तमाः ॥९६॥

तेषां च देहोऽद्भुतरूपगन्धो,
निरामयः स्वेदमलोज्झितश्च ।
श्वासोऽब्जगन्धो रुधिरामिषन्तु,
गोक्षीरधाराधवलं ह्यविस्रम् ॥९७॥

आहारनीहारविधिस्त्वदृश्य-
श्चत्वार एतेऽतिशयाः सहोत्थाः ।
क्षेत्रे स्थितिर्योजनमात्रकेऽपि,
नृदेवतिर्य्यग्जनकोटिकोटेः ॥९८॥

वाणी नृतिर्य्यक्सुरलोकभाषा-
संवादिनी योजनगामिनी च ।
भामण्डलं चारु च मौलिपृष्ठे,
विडम्बिताहर्पतिमण्डलश्रि ॥९९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साग्रे च गव्यूतिशतद्वये रुजो
वैरेतयो[६] मार्य्यतिवृष्ट्यवृष्टयः ।
दुर्भिक्षमन्यस्वकचक्रतो भयं
स्यान्नैत एकादश कर्म्मघातजाः ॥६०॥

खे धर्मचक्रं चमरीः सपाद-
पीठं मृगेन्द्रासनमुज्ज्वलञ्च ।
छत्रत्रयं रत्नमयो ध्वजोऽङ्घ्रि-
न्यासे च चामीकरपङ्कजानि ॥६१॥

वप्रत्रयं चारु चतुर्मुखाङ्कता, ।
चैत्यद्रुमोऽधोवदनाश्च कण्टकाः
द्रुमानतिर्दुन्दुभिनाद उच्चकै-
र्वातोऽनुकूलः शकुनाः प्रदक्षिणाः ॥६२॥

गन्धाम्बुवर्षं बहुवर्णपुष्प-
वृष्टिः कचश्मश्रुनखाप्रवृद्धिः ।
चतुर्विधामर्त्यनिकायकोटि-
र्जघन्यभावादपि पार्श्वदेशे ॥६३॥

ऋतूनामिन्द्रियार्थानामनुकूलत्वमित्यमी ।
एकोनविंशतिर्देव्याश्चतुस्त्रिंशच्च मीलिताः ॥६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्कारवत्त्वमौदात्त्यमुपचारपरीतता[1] ।
मेघगम्भीरघोषत्वं, प्रतिनादविधायिता[2] ॥६५॥
दक्षिणत्वमुपनीतरागत्वञ्च महार्थता[3] ।
अव्याहतत्वं शिष्टत्वं, संशयानामसम्भवः[4] ॥६६॥
निराकृतान्योत्तरत्वं, हृदयङ्गमतापि च[5] ।
मिथः साकाङ्क्षता[6] प्रस्तावौचित्यं तत्त्वनिष्ठता[7] ॥६७॥
अप्रकीर्णप्रसृतत्वमस्वश्लाघान्यनिन्दिता[8] ।
आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता[9] ॥६८॥

---

०१ संस्कृतादिलक्षणवत्त्वं । ०२ उच्चैर्वृत्तिता । ०३ उपचाररहितत्वं । ०४ मेघस्येव गम्भीरशब्दत्वं । ०५ प्रतिध्वनियुक्तत्वं । ०६ सरलत्वं । ०७ मालवकौशिक्यादिग्रामरागयुक्तत्वं। एते शब्दाश्रया वाग्गुणा ज्ञेयाः, अन्ये अर्थाश्रया वाग्गुणाः । ०८ बृदहभिधेयता । ०९ पूर्वापरवाक्यार्थाविरोधित्वादव्याहतत्वं । ०१० अभिमतसिद्धौ वक्तुर्मनोज्ञार्थप्रयोजकत्वं शिष्टतासूचकत्वं वा । ०११ असंदिग्धता । ०१२ परदूषणाविषयता । ०१३ हृदयग्राह्यत्वं । ०१४ परस्परेण पदानां वाक्यानां वा सापेक्षत्वं । ०१५ देशकालाद्यव्यतीतत्वं । ०१६ विवक्षितवस्तुस्वरूपानुसारिता । ०१७ सुसम्बन्धस्य सतः प्रसरणं । ०१८ स्वश्लाघाऽऽत्मोत्कर्षः परनिन्दा च तयोर्विप्रयुक्तत्वं । ०१९ बन्धस्य प्रतिपाद्यस्य वा भूमिकानुसारित्वं । ०२० घृतगुडादिवत् सुखकारित्वं । ०२१ प्राप्तश्लाघ्यता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरमर्म्मावेधितौदार्य्यं[२२], धर्मार्थप्रतिबद्धता[२४] ।
कारकाद्यविपर्य्यासो[२५], विभ्रमादिवियुक्तता[२६] ॥६९॥

चित्रकृत्त्वमदद्भुतत्वं[२७], तथाऽनतिविलम्बिता[२९] ।
अनेकजातिवैचित्र्यमारोपितविशेषता[३०] ॥७०॥

सत्त्वप्रधानता[३२] वर्णपदवाक्यविविक्तता[३३] ।
अव्युच्छित्तिरखेदित्वं[३४-३५], पञ्चत्रिंशच्च वाग्गुणाः ॥७१॥

अन्तरायाः[१] दानलाभवीर्यभोगोपभोगगाः[२-५] ।
हासो[६] रत्यरती[७] भीतिर्जुगुप्सा[८] शोक[९] एव च ॥७२॥

कामो[१२] मिथ्यात्वमज्ञानं[१३-१४], निद्रा[१५] चाविरतिस्तथा[१६] ।
रागो[१७] द्वेषश्च[१८] नो दोषास्तेषामष्टादशाप्यमी ॥७३॥

---

०२२ अपरमर्म्माबुद्ध्यानस्वरूपं । ०२३ अभिधेयस्यातुच्छता । ०२४ धर्मार्थाभ्यामनपेतत्वं । ०२५ कारककालवचनलिङ्गादिविपर्य्यासरहित्यं । ०२६ मनोदोषवियुक्तत्वं । ०२७ उत्पादिताच्छिन्नकुतूहलत्वं । ०२८ प्रतीतत्वं । ०२९ अनतिविलम्बिता प्रतीता । ०३० अनेकवर्णनीयवस्तुस्वरूपवर्णनसंश्रयादतिविचित्रत्वं । ०३१ वचनान्तरापेक्षया आहितविशेषत्वं । ०३२ साहसोपतता । ०३३ वर्णपदवाक्यानां विच्छिन्नत्वं । ०३४ विवक्षितार्थसम्यक्सिद्धिः अव्यवच्छिन्नवचनप्रमेयता । ०३५ अनाकुलसंभवः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महानन्दोऽमृतं[२] सिद्धिः[३], कैवल्यमपुनर्भवः ।
शिवं निःश्रेयसं श्रेयो[४], निर्वाणं ब्रह्म निर्वृतिः[५] ॥७४॥
महोदयः सर्वदुःखक्षयो निर्वाणमक्षरम्[६] ।
मुक्तिर्मोक्षोऽपवर्गोऽथ[७], मुमुक्षुः श्रमणो यतिः ॥७५॥
वाचंयमो यती साधुरनगारः ऋषिर्मुनिः[८] ।
निर्ग्रन्थो[९] भिक्षुरस्य स्वं, तपोयोगशमादयः ॥७६॥
अभाषणं पुनर्मौनं[२], गुरुर्धर्मोपदेशकः ।
मोक्षोपायो योगो ज्ञानश्रद्धानचरणात्मकः ॥७७॥
अनुयोगकृदाचार्य, उपाध्यायस्तु पाठकः ।
अनूचानः प्रवचने, साङ्गोऽधीती गणिश्च सः ॥७८॥
शिष्यो विनेयोऽन्तेवासी, शैक्षः प्राथमकल्पिकः[३] ।
सतीर्थ्यस्त्वेकगुरवो, विवेकः[३] पृथगात्मता ॥७९॥
एकब्रह्मव्रताचारा, मिथः सब्रह्मचारिणः[३] ।
स्यात्पारम्पर्य्यमाम्नायः[३], सम्प्रदायो गुरुक्रमः ॥८०॥
व्रतादानं[१] परिव्रज्या, तपस्या[२] नियमस्थितिः ।
अहिंसा सूनृतोऽस्तेयब्रह्माकिञ्चनता[३] यमाः ॥८१॥
नियमाः शौचसन्तोषौ[२], स्वाध्यायतपसी[४] अपि ।
देवताप्रणिधानञ्च, करणं पुनरासनं ॥८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणायामैः प्राणयमैः, श्वासप्रश्वासरोधनम् ।
प्रत्याहारस्त्विन्द्रियाणां, विषयेभ्यः समाहृतिः ॥८३॥
धारणा तु क्वचिद्ध्येये, चित्तस्य स्थिरबन्धनम् ।
ध्यानन्तु विषये तस्मिन्नेकप्रत्ययसन्ततिः ॥८४॥
समाधिस्तु तदेवार्थमात्राभासनरूपकम् ।
एवं योगो यमाद्यङ्गैरष्टभिः सम्मतोऽष्टधा ॥८५॥
श्वःश्रेयसं शुभंशिवे कल्याणं श्रोवसीयसं श्रेयः ।
क्षेमं भाव्युकमविकंकुशलंमङ्गलंभद्रंमद्रंशस्तीनि ॥८६॥

इत्याचार्य्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ
नाममालायां देवाधिदेवकाण्डः प्रथमः ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ देवकाण्डः द्वितीयः ॥

स्वर्गस्त्रिविष्टपं द्यौर्दिवौ मुँवि स्तविषैताविषौ नार्कः ।
गौस्त्रिदिवंमूर्ध्वलोकः सुरालयस्तत्सदस्त्वमरौः ॥८७॥

देवाः सुपर्वसुरनिर्जरदेवतैर्भु-
बर्हिर्मुखानिमिषदेवतनाकिलेखाः ।
वृन्दारकाः सुमनसस्त्रिदशा अमर्त्याः,
स्वाहा-स्वधा-क्रतु-सुधा-भुजे आदितेयाः ॥८८॥

गीर्वाणा महतोऽस्वप्नाः, विबुधा दानवारयः ।
तेषां यानं विमानोऽन्वः, पीयूषममृतं सुधा ॥८९॥

असुरा नागास्तडितः सुपर्णका वह्नयोऽनिलाः स्तनिताः ।
उदधिद्वीपदिशो दश भवनाधीशाः कुमारान्ताः ॥९०॥

स्युः पिशाचा भूता यक्षा राक्षसाः किन्नरा अपि ।
किम्पुरुषा महोरगा, गन्धर्वा व्यन्तरा अमी ॥९१॥

ज्योतिष्काः पञ्च चन्द्रार्कग्रहनक्षत्रतारकाः ।
वैमानिकाः पुनः कल्पभवा द्वादश ते त्वमी ॥९२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौधर्म्म-ईशान-सनत्कुमार-माहेन्द्र-ब्रह्म-लान्तक-जाः ।
शुक्र-सहस्रारा-नतप्राणत-जा आरणी-च्युतेजाः ॥९४॥
कल्पातीता नव ग्रैवेयकाः पञ्च त्वनुत्तराः ।
निकायभेदादेते स्युर्देवाः किल चतुर्विधाः ॥९४॥
आदित्यः सविताऽर्य्यमा खरसहस्रोष्णांशुरंशू रविः,
मार्त्तण्डस्तरणिर्गभस्तिरुणो भानुर्नभो-ऽहर्म्मणिः ।
सूर्योऽर्कः किरणो भगो ग्रहपुषः पुषा पतङ्गः खगो,
मार्तण्डो यमुना-कृतान्तजनकः प्रद्योतनस्तापनः ॥९५॥
ब्रध्नो हंसः श्वित्रभानुर्विवस्वान्,
सूरस्त्वष्टा द्वादशात्मा च हेलिः ।
मित्रो ध्वान्तारातिरब्जां-शु-हस्त-
श्चक्राब्जौ-हे-बान्धवः सप्तसप्तिः ॥९६॥
दिवा-दिना-ह-र्दिवस-प्रभा-विभा-
भासः-करैः स्यान्मिहिरो विरोचनैः ।
ग्रहा-ब्जिनी-गो-द्यु-पतिर्विकर्त्तनो
हरिः शुचीनौ गगना-द्भुजा-ध्वगौ ॥९७॥
हरिदश्वो जगत्कर्म-साक्षी भास्वान् विभावसुः ।
त्रयीतनुर्जगच्चक्षुस्तपनोऽरुणसारथिः ॥९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोचिरुल्लसनरुचिशोचिरंशुगो[६], ज्योतिरर्चिरुपवृत्त्यैभीशवः ।
प्रग्रहः शुचिमरीचिदीप्तयो, धामकेतुघृणिरश्मिवृश्मयः ॥९९॥
पाददीधितिकरद्युतिद्युतो, रुग्विरोककिरणत्विषित्विषः ।
भाः प्रभाविसुगभस्तिभानवो भौ मयूखमहसी छविर्विभौ ॥
॥१००॥
प्रकाशस्तेज उद्योतः, आलोको वर्च्च आतपः ।
मरीचिका मृगतृष्णा, मण्डलं तूपसूर्यकम् ॥१०१॥
परिधिः परिवेषश्च, सूरसूतस्तु काश्यपिः ।
अनूरुर्विनतासूनुर्गरुणो गरुडाग्रजः ॥१०१॥
रेवन्तस्त्वकरेतोजः, प्लवंगो हयवाहनः ।
अष्टादश माठराद्याः, सवितुः पारिपार्श्विकाः ॥१०३॥
चंद्रमाः कुमुदबान्धवो दशश्वेतवाज्यमृतसूस्तिथिप्रणीः ।
कौमुदी-कुमुदिनी-म-दक्षजा-रोहिणी-द्विज-निशौषधी-पतिः ॥
॥ १०४ ॥

जैवातृकोऽब्जश्च कला-शशै-ण-
च्छाया-भृदिन्दुर्विधुरत्रिदृग्जः ।
राजा निशो रत्नकरौ च चन्द्र :
सोमोऽमृत-श्वेत-हिम-द्युतिर्ग्लौः ॥ १९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षोडशोऽर्शः कलौ चिह्नं[3], लक्षणं[4] लक्ष्म[5] लाञ्छनम्[6] ।
अङ्कः कलङ्कोऽभिज्ञानं, चन्द्रिका[1] चन्द्रगोलिका[2] ॥१०६॥
चन्द्रातप[3]ः कौमुदी[4] च, ज्योत्स्ना[5] बिम्बं[6] तु मण्डलम्[7] ।
नक्षत्रं[1] तारका[2] ताराज्योतिषी[3] भमुडु[4] ग्रहः[5] ॥१०७॥
विष्ण्यमृक्षमथाश्विन्यश्वकिनी[1] दक्षदेवता[2] ।
अश्वयुग्[3] बालिनी[4] चाथ, भरणी यमदेवता[5] ॥१०८॥
कृत्तिका[1] बहुलाश्वाग्निदेवा[2] बाह्वी[3] तु रोहिणी[4] ।
मृगशीर्षं[1] मृगशिरो[2], मार्गशीर्षान्द्रमसं[3] मृगः[4] ॥१०९॥
इल्वलास्तु मृगशिरःशिरःस्थाः पञ्च तारकाः ।
आर्द्रा[1] तु कालिनी[2] रौद्री[3], पुनर्वसू[1] तु यामकौ[2] ॥११०॥
आदितेयौ च पुष्यस्तिष्यः[1], सिध्यश्च[2] गुरुदैवतः[3] ।
सार्प्पोश्लेषा मघाः[1] पित्र्याः[2], फाल्गुनी[3] योनिदेवता[4]॥१११॥
सा तूत्तरार्य्यमदेवा[1], हस्तः[2] सवितृदैवतः[3] ।
त्वाष्ट्री[1] चित्रोऽऽनिली[2] स्वातिर्विशाखेन्द्राग्निदेवता[3]॥११२॥
राधोऽनुराधा[1] तु मैत्री[2], ज्येष्ठेन्द्री[3] मूल[1] आश्रपः[2] ।
पूर्वाषाढाऽऽपी[1] सोत्तरा[2], स्याद्वैश्वी[3] श्रवणः[4] पुनः ॥११३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हरिदेवैः श्रविष्ठौ तु, धनिष्ठौ वसुदेवतौ ।
वारुणी तु शतभिषग्जा-हिर्बुध्न्य-देवताः ॥११४॥
पूर्वोत्तरा भाद्रपदौ, द्व्यः प्रोष्ठपदौश्च ताः ।
रेवती तु पौष्ण दाक्षायण्यः सर्वाः शशिप्रियोः ॥११५॥
राशीनामुदयो लग्नं, मेषप्रभृतयस्तु ते ।
आरो वक्रो लोहिताङ्गो, मङ्गलोऽङ्गारकः कुजः ॥११६॥
आषाढाभूर्नवार्चिश्च, बुधः सौम्यः प्रहर्षुलः ।
ज्ञः पञ्चार्चिः श्रविष्ठाभः, श्यामाङ्गो रोहिणीसुतः ॥११७॥
बृहस्पतिः सुराचार्यो, जीवश्चित्रशिखण्डिजः ।
वाचस्पतिर्द्वादशार्चिर्धिषणः फाल्गुनीभवः ॥११८॥
गीर्बृहत्योः पतिरुतथ्यानुजाङ्गिरसौ गुरुः ।
शुक्रो मघाभवः काव्यः, उशनाः भार्गवः कविः ॥११९॥
षोडशार्चिर्दैत्यगुरुर्धिष्ण्यः शनैश्चरः शनिः ।
छायासुतोऽसितः सौरिः, सप्तार्चिः रेवतीभवः ॥१२०॥
मन्दः क्रोडो नीलवासाः, स्वर्भानुस्तु विधुन्तुदः ।
तमो राहुः सैंहिकेयो, भरणीभूरथाहिकः ॥१२१॥
अश्लेषाभूः शिखी केतुर्ध्रुवस्तूत्तानपादजः ।
अगस्त्योऽगस्तिः पीताब्धिर्वातापिर्द्विड् घटोद्भवः ॥१२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मैत्रावरुणिराग्नेयः, और्वशेयाग्निमारुतौ ।
लोपामुद्रौ तु तद्भार्या, कौषीतकी वरप्रदा ॥१२३॥
मरीचीप्रमुखाः सप्तर्षयश्चित्रशिखण्डिनः ।
पुष्पदन्तौ पुष्पवन्तावेकोक्त्या शशिभास्करौ ॥१२४॥
राहुग्रासोऽर्केन्द्वोर्ग्रहः, उपरागः उपप्लवः ।
उदलिङ्गं त्वरिष्टं स्यादुपसर्ग उपद्रवः । ॥१२५॥
अजन्येमीतिरुत्पातो, वन्ह्युत्पातः उपाहितः ।
स्यात्कालः समयो दिष्टानेहसौ सर्वमूषकः ॥१२६॥
कालो द्विविधोऽवसर्पिण्युत्सर्पिणीविभेदतः ।
सागरकोटीकोटीनां, विंशत्या स समाप्यते ॥१२७॥
अवसर्पिण्याः षडरा उत्सर्पिण्यास्त एव विपरीताः ।
एवं द्वादशभिरैर्विवर्त्तते कालचक्रमिदम् ॥१२८॥
तत्रैकान्तसुषमोऽश्चतस्रः कोटिकोट्यः ।
सागराणां सुषमा तु, तिस्रस्तत्कोटिकोट्यः ॥१२९॥
सुषमदुष्षमौ ते द्वे, दुष्षमसुषमौ पुनः ।
सैका सहस्रैर्वर्षाणां, द्विचत्वारिंशतोनिता ॥१३०॥
अथ दुष्षमैकविंशतिरब्दसहस्राणि तावती तु स्यात् ।
एकान्तदुष्षमोऽपि ह्येतत्सङ्ख्याः परेऽपि विपरीताः॥१३१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमेऽरत्रये मर्त्यास्त्रिद्व्येकपल्यजीविताः ।
त्रिद्व्येकगव्यूतोच्छ्रायास्त्रिद्व्येकदिनभोजनाः ॥१३२॥
कल्पद्रुफलसन्तुष्टाश्चतुर्थे त्वरके नराः ।
पूर्वकोट्यायुषः पञ्चधनुःशतसमुच्छ्रयाः ॥१३३॥
पञ्चमे तु वर्षशतायुषः सप्तकरोच्छ्रयाः ।
षष्ठे पुनः षोडशाब्दायुषो हस्तसमुच्छ्रयाः ॥१३४॥
एकान्तदुःखप्रचिता, उत्सर्पिण्यामपीदृशाः ।
पञ्चानुपूर्व्या विज्ञेया, अरेषु किल षट्स्वपि ॥१३५॥
अष्टादश निमेषाः स्युः, काष्ठा काष्ठाद्वयं लवैः ।
कला तैः पञ्चदशभिर्लेशस्तद्वितयेन च ॥१३६॥
क्षणस्तैः पञ्चदशभिः, क्षणैः षड्भिश्च नाडिका ।
सा धारिका च घटिका, मुहूर्त्तस्तद्वयेन च ॥१३७॥
त्रिंशता तैरहोरात्रैस्तत्राहर्दिवसो दिनम् ।
दिवा युर्वासरो घस्रः, प्रभातं स्यादहर्मुखम् ॥१३८॥
व्युष्टं विभातं प्रत्यूषः, कल्यप्रत्युषसी उषः ।
काल्यं मध्याह्नस्तु दिवामध्यं मध्यन्दिनं च सः ॥१३९॥
दिनावसानमुत्सूरो, विकालसवेलौ अपि ।
सायं सन्ध्या तु पितृसूस्त्रिसन्ध्यं तूपवेणवम् ॥१४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्राद्धकालस्तु कुतपोऽष्टमो भागो दिनस्य यः ।
निशा निशीथिनी[२] रात्रिः, शर्वरी[३] क्षणदा क्षपा ॥१४१॥
त्रियामा यामिनी[४] भौती[५], तमी तमा[६] विभावरी ।
रजनी वसती श्यामा[७], वासतेयी तमस्विनी ॥१४२॥
उर्वी दोषेन्दुकान्तोऽथ ,तमिस्रा दर्शयोमिनी ।
ज्यौत्स्नी तु पूर्णिमारात्रिर्गणरात्रो निशागणः ॥१४३॥
पक्षिणी पक्षतुल्याभ्यामहोभ्यां वेष्टिता निशा ।
गर्भकं रजनीद्वन्द्वं, प्रदोषो यामिनीमुखम् ॥१४४॥
यामः प्रहरो निशीथस्त्वर्धरात्रो महानिशा ।
उच्चन्दस्त्वपररात्रस्तमिस्रं तिमिरं तमः ॥१४५॥
ध्वान्तं भूच्छायोऽन्धकारं, तमसं सम-वा-न्धतमः ।
तुल्यनक्तन्दिने काले, विषुवद्विषुवं च तत् ॥१४६॥
पञ्चदशाहोरात्रः स्यात्पक्षः स बहुलोऽसितः ।
तिथिः[१] पुनः कर्ममवोटी, प्रतिपत्पक्षतिः[२] समे ॥१४७॥

---

१ दिवसस्य योऽष्टमो भागः स श्राद्धकालः कुतपश्च उच्यते इत्यर्थः । दिवसस्य पुराणोक्तानि रौद्रादीनि भगान्तानि पञ्चदश मुहूर्त्तानि, तन्मध्ये गणनाक्रमेण योऽष्टमो मुहूर्त्तः स कुतप उच्यते । तत्प्रयोजनं च श्राद्धे, अन्यकर्मणि अष्टमो मुहूर्त्तः अभिजिदाख्य एव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चदश्यौ यज्ञकालौ, पक्षान्तौ पर्वणी[४] अपि ।
तत्पर्वमूलं भूतेष्टापञ्चदश्योर्यदन्तरम् ॥१४८॥
स पर्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।
पूर्णिमा पौर्णमासी[२] सा, राका[३] पूर्णे निशाकरे ॥१४९॥
कलाहीने त्वनुमतिर्भागशीर्ष्याग्रहायणी ।
अमा[१]मावस्यैमावश्या[३], दर्शः सूर्येन्दुसङ्गमे ॥१५०॥
अमावास्या[६]मावासी च, सा नष्टेन्दुः कुहूः[३] कुहूः ।
दृष्टेन्दुस्तु सिनीवाली[१], भूतेष्टा तु चतुर्दशी ॥१५१॥
पक्षौ मासो वत्सरादि[१]र्मार्गशीर्षः[२] सहः[३] सहाः[३] ।
आग्रहायणि[४]कश्चाथ, पौषस्तैषः[३] सहस्यवत् ॥१५२॥
माघस्तपाः[१] फाल्गुनस्तु[१], फाल्गुनिक[२]स्तपस्यवत् ।
चैत्रो मधु[१]श्चैत्रिकश्च[२], वैशाखे रा[३]धमाधवौ[३] ॥१५३॥
ज्येष्ठस्तु शुक्रो[३]ऽथाषाढः[३], शुचिः स्याच्छ्रा[१]वणो नभाः[१] ।
श्रावणि[३]कोऽथ नभस्यः[१], प्रौष्ठभाद्रपरः पदः[३] ॥१५४॥
भाद्र[४]श्चाप्याश्विने[१] त्वाश्वयुजेषावथ कार्तिकः[२] ।
कार्त्तिकि[३]को बाहुलो[४]ऽन्यौ, द्वौ द्वौ मार्गादिकावृतुः ॥१५५॥
हेमन्तः प्रशा[१]लो रौद्रो[३]ऽथ शैषशिशिरौ[२] समौ ।
वसन्तो इष्यैः सुरभि[३], पुष्पकालो बलाङ्गकः[३] ॥१५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उष्णे उष्णागमो ग्रीष्मो, निदाघस्तपे उष्मकः ।
वर्षास्तपात्ययः प्रावृण्, मेघात्कालो-गमौ क्षरी ॥१५७॥
शरद् घनात्ययोऽयनं, शिशिरादैस्त्रिभिस्त्रिभिः ।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ॥१५८॥
स संपर्यनूदग्र्यो वर्ष, हायनोऽब्दः समाः शरत् ।
भवेत्पैत्रं तदहोरात्रं, मासेनाब्देन दैवतम् ॥१५९॥
दैवे युगसहस्रे द्वे, ब्राह्मं कल्पौ तु ते नृणाम् ।
मन्वन्तरं तु दिव्यानां, युगानामेकसप्ततिः ॥१६०॥
कल्पो युगान्तः कल्पान्तः, संहारः प्रलयः क्षयः ।
संवर्त्तः परिवर्त्तश्च, समसुप्तिर्जिहानकः ॥१६१॥
तत्कालस्तु तदात्वं स्यात्तज्ज्ञं सान्दृष्टिकं फलम् ।
आयतिस्तूत्तरः काल, उदर्कस्तद्भवं फलम् ॥१६२॥
व्योमान्तरिक्षं गगनं घनाश्रयो,
विहायः आकाशमनन्तपुष्करे ।
अभ्रं सुरा-भ्रो-द्रु-मरु-त्पथोऽम्बरं,
खं द्यादिवौ विष्णुपदं वियन्नभः ॥१६३॥
नभाटं तडित्वान्मुदिरो घनाघनोऽ-
भ्रं धूमयोनिस्तनयित्नुमेघाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीमूतपर्जन्यबलाहकौ घनो[१२],
धाराधरो वाहनदमुग्वरा जलात् ॥१६४॥
कादम्बिनी मेघमाला, दुर्दिनं मेघजं तमः
आसारो वेगवान् वर्षो, वातास्तं वारि शीकरैः ॥१६५॥
वृष्टौ वर्षणवर्षं तद्विघ्ने ग्राहग्रहौ वधात् ।
घनोपलस्तु करकः, काष्ठाऽऽशा दिग् हरित्ककुप् ॥१६६
पूर्वा प्राची दक्षिणाऽपाची प्रतीची तु पश्चिमा ।
अपराऽथोत्तरोदीची, विदिक् त्वपदिशं प्रदिक् ॥१६७॥
दिश्यं दिग्भवस्तुन्यपागपाचीनमुदग्दीचीनम् ।
प्राक् प्राचीनं च समे प्रत्यक् तु स्यात्प्रतीचीनम्॥१६८॥
तिर्य्यग्दिशां तु पतय, इन्द्राग्नियमनैर्ऋताः ।
वरुणो वायुकुबेरावीशानश्च यथाक्रमम् ॥१६९॥
ऐरावतः पुण्डरीको, वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः, सुप्रतीकश्च दिग्गजाः ॥१७०॥
इन्द्रो हरिर्दुश्चयवनोऽच्युताग्रजो,
वज्री बिडौजा मघवान् पुरन्दरः ।
प्राचीनबर्हिः पुरुहूतवासवौ[११],
सङ्क्रन्दनाखण्डलमेघवाहनाः ॥१७१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुत्रामवास्तोष्पतिदेल्यिशक्रीः वृषा सुनासीरसहस्रनेत्रौ ।
पर्जन्यहर्यश्वऋभुक्षिबाहुदन्तेयवृद्धश्रवसस्तुराषाट् ।।१७२।।
सुरर्षभस्तपस्तक्षो जिष्णुर्वरशतक्रतुः ।
कौशिकः पूर्वदिग्-देवाप्सरः-स्वर्ग-शची-पतिः ।।१७३।।
पृतनाषाडुग्रधन्वा, मरुत्वान्मघवाऽस्य तु ।
द्विषः पाकोऽद्रयो वृत्रः, पुलोमा नमुचिर्बलः ।।१७४।।
जम्भः प्रिया शचीन्द्राणी, पौलोमी जयवाहिनी ।
तनयस्तु जयन्तः स्याज्जयदत्तो जयश्च सः ।।१७५।।
सुता जयन्ती तविषी, ताविष्युच्चैःश्रवा हयः ।
मातलीः सारथिर्देवनन्दी द्वाःस्थो गजः पुनः ।।१७६।।
ऐरावणोऽभ्रमातङ्गश्चतुर्दन्तोऽर्कसोदरः ।
ऐरावतो हस्तिमल्लः, श्वेतगजोऽभ्रमुप्रियः ।।१७७।।
वैजयन्तौ तु प्रासादध्वजौ पुर्य्यमरावती ।
सरो नन्दीसरः पर्षत्सुधर्मा नन्दनं वनम् ।।१७८।।
वृक्षाः कल्पैः पारिजातो, मन्दारो हरिचन्दनः ।
सन्तानश्च धनुर्देवायुधं तदजु रोहितम् ।।१७९।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीर्घज्वैरावतं वज्रं, त्वशनिर्ह्रादिनी स्वरुः ।
शतकोटिः पविः शम्बो, दम्भोलिर्भिदुरं भिदुः ॥१८०॥
व्याधूमैः कुलिशोऽस्यार्चिरतिभीः स्फूर्जथुर्ध्वनिः ।
स्वर्वैद्यावश्विनीपुत्रावश्विनौ वडवासुतौ ॥१८१॥
नासिक्यौवर्कजौ दस्रौ, नासत्यौवब्धिजौ यमौ ।
विश्वकर्मा पुनस्त्वष्टा, विश्वकृद्देववर्द्धकिः ॥१८२॥
स्वःस्वर्गिवश्चेोऽप्सरसः, स्वर्वेश्यौ उर्वशीमुखाः ।
हाहादयस्तु गन्धर्वा, गान्धर्वौ देवगायनाः ॥१८३॥
यमैः कृतान्तैः पितृदक्षिणाशा-
प्रेतात्पैतिर्दण्डधरोऽर्कसूनुः ।
कीनाशमृत्यू समवर्त्तिकालौ
शीर्णाङ्घ्रिहर्य्यन्तकधर्मराजाः ॥१८४॥
यमराजैः श्राद्धदेवः, शमनो महिषध्वजैः ।
कालिन्दीसोदरश्चापि, धूमोर्णा तस्य वल्लभा ॥१८५॥
पुरी पुनः संयमनी, प्रतीहारस्तु वैध्यतैः ।
दासौ चण्डमहाचण्डौ, चित्रगुप्तस्तु लेखकः ॥१८६॥
स्याद्राक्षसैः पुण्यजनो नृचक्षाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यौत्वौशरैः कौणपयातुधानौ ।
रात्रिञ्चरो रात्रिचरैः पलाशैः
कीनाशरक्षोनिकसात्मजाश्च ॥१८७॥
क्रव्यात्कर्बुरनैर्ऋतावसृक्पो
वरुणस्त्वर्णवमन्दिरैः प्रचेताः ।
जल-यादःपतिपाशिमघनादा
जलकान्तारैः स्यात्परञ्जनश्च ॥१८८॥
श्रीदैः सितोदरैकुहेशसखाः पिशाचैः
कीच्छावसुस्त्रिशिरैः ऐडविलैकपिङ्गाः ।
पौलस्त्यवैश्रवणैरब्धकरीः कुबेरैः
यैक्षौ नृधर्म्मवनदौ नरवाहनश्च ॥१८९॥
कैलासौकाः यक्ष-धन-निधि-किम्पुरुषे-श्वरैः ।
विमानं पुष्पकं चैत्ररथं वनं पुरी प्रभौ ॥१९०॥
भलकौ वस्वोकसारा, सुतोऽस्य नलकूबरैः ।
वित्तं रिक्थं स्वापतेयं, राः सारं विभवो वसु ॥१९१॥

---

(१) यातु यातुनी पुंस्यपि, यदाह धनपालः "क्रव्यादा यातवो यातुधानाः" इति ।

२ पुंस्यपि, यदाह धनपालः "सारोऽर्थो द्रविणं धनं" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्युम्नं द्रव्यं पृथ्वं मृत्वं, स्वमृक्थं द्रविणं धनम् ।
हिरण्यार्थौ निधानं तु, कुनाभिः शेवधिर्निधिः ॥१९२
महापद्मश्च पद्मश्च, शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलार्श्च, चर्चार्श्च निधयो नव ॥१९३॥
यक्षैः पुण्यजनो राजा, गुह्यको वटवाम्यपि ।
किन्नरस्तु किम्पुरुषस्तुरङ्गवदनो मयुः ॥१९४॥
शम्भुः शर्वः स्थाणुरीशान ईशो,
रुद्रोऽङ्गीशो वामदेवो वृषाङ्कः ।
कण्ठेकालः शङ्करो नीलकण्ठः,
श्रीकण्ठोग्रौ भूर्जटिर्भीम-भर्गौ ॥१९५॥
मृत्युञ्जयः पञ्चमुखोऽष्टमूर्त्तिः,
श्मशानवेश्मा गिरिशो गिरीशः ।
षण्ढः कपर्दीश्वर ऊर्द्धलिङ्ग,
एक-त्रि-हक् भालदृगेकपादः ॥१९६॥

---

१ चर्चाः चर्चसौ चर्चसः इत्यादि । २ सद्योजातः १ वामदेवः २ अघोरः ३ तत्पुरुषः ४ ईशानः ५ति पञ्च मुखानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृडोऽट्टहासी[३२] घनवाहनोऽहि-[३३] [३४] [३५]

बुध्नो[३६] विरूपाक्षविषान्तकौ[३७] च[३८] ।

महाव्रतो[३९] वह्नि-हिरण्यरेताः[४१]

शिवोऽस्थिधन्वा[४२] पुरुषास्थिमाली[४३][४४]॥१९७॥

स्याद् व्योमकेशः[४५] शिपिविष्टभैरवो,[४६]

दिक्-कृत्ति-वासा[४७] भवनीललोहितौ[४८][४९] ।

सर्व्वज्ञ-नाट्यप्रियखण्डपर्शवो,[५०][५१][५२]

महापरा देव-नटे-श्वरौ[५३] हरेः ॥१९८॥

पशु-प्रथम-भूतो-मा-पतिः[५४] पिङ्ग[५५]-जटेक्षणः ।

पिनाक-शूल-खट्वाङ्ग-गङ्गा-ऽहीन्दु-कपाल-भृत्[५६] ॥१९९॥

गज-पृष-पुरा-नङ्ग-काला-न्धक-मखाऽसुहृद् ।

कपर्द्दोऽस्य[१] जटाजूटः[२], खट्वाङ्गस्तु[३] सुखंसुणः[४] ॥२००॥

पिनाकं[१] स्यादाजगवं[२]मजकावं[३] च तद्धनुः ।

ब्राह्म्याद्या मातरः[१] सप्त, प्रमथाः[२] पार्षदा गणाः[३] ॥२०१॥

अणिमा[१] वशितेशित्वं[२], प्राकाम्यं[३] महिमाऽणिमा[४] ।

यत्र कामावसायित्वं[५], प्राप्तिरैश्वर्यमष्टधा[६] ॥२०२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौरी[१] काली[२] पार्वती[३] मातृमाता[४]-
ऽपर्णा रुद्राण्यम्बिकौ[५] त्र्यम्बिकोमौ[६]।
दुर्गा[७] चण्डी[८] सिंहयानी[९] मृडानी[१०],
कात्यायन्यौ[११] दक्षजाख्या[१२] कुमारी[१३]॥२०३॥
सती[१४] शिवा[१५] महादेवी[१६], शर्व्वाणी[१७] सर्व्वमङ्गला[१८]।
भवानी[१९] कृष्ण-मैनाक-स्वसा[२०] मेनाद्रिजेश्वरा[२१] [२२] ॥२०४॥
निशुम्भ-शुम्भ-महिष-मथनी[२३] भूतनायिका[२४]।
तस्याः सिंहो मनस्तालैः[२५], सख्यौ[२६] तु विजयौ[२७] जयौ[२८]॥२०५॥
चामुण्डा[१] चर्चिका[२] चर्म्ममुण्डा[३] माज्जारकर्णिका[४]।
कर्णमोटी[५] महागन्धा[६], भैरवी[७] च कपालिनी[८] ॥२०६॥
हेरम्बो[१] गण-विघ्नेशः[२], पर्शुपाणिर्विनायकः[३]।
द्वैमातुरो[४] गजास्यैकदन्तौ[५] लम्बोदरांखुगौ[६] ॥२०७॥
स्कन्दः[१] स्वामी[२] महासेनः[३], सेनानीः[४] शिखिवाहनः[५]।
षाण्मातुरो[६] ब्रह्मचारी[७], गङ्गो-मा-कृत्तिका-सुतः[८] ॥२०८॥
द्वादशाक्षो[९] महातेजाः[१०], कुमारः[११] षण्मुखो गुहः[१२]।
विशाखः[१३] शक्तिभृत्[१४] क्रौञ्च-तारकारिः[१५] शरा-ग्नि-भूः[१६] ॥२०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]ी भृङ्गिरिटि[2]भृङ्गिरिटि[3]र्नाड्य-स्थि-विग्रहैः ।
[1]माण्डके केलिकिलो, नन्दीशे तण्डु-[2]नन्दिनौ [3] ॥२१०॥
[1]णो विरिञ्चिर्दुहिणो विरिञ्चैः,
परमेष्ठ्य[3]नोऽष्टश्रवणैः स्वयम्भूः ।
[10]नैः कविः सात्त्विक[11]वेदगर्भौ, [12]
स्थविरः शतानन्द[14]पितामहौ [15] कः [16] ॥२११॥
[17]ा विधाता [19]विधिवेधसौ [20] धुवैः,
पुराण[22]गो [23] हंसग[24]विश्वरेतसौ ।
[25]पति[26]ब्रह्मा[27]चतुर्मुखो भवा-
न्तकृज्जगत्कर्तृ[29]सरोरुहासनौ [30] ॥२१२॥
[31]ः शतधृतिः स्रष्टा, सुरज्येष्ठो [34] विरिञ्चि[35]नैः ।
[36]यगर्भो लोकेशो, नाभि-[38]ब्रह्मा-त्म-[40]भूरपि ॥२१३॥
[41]र्जिष्णु[42]जनार्द[43]नो हरि[44]र्हृषीकेशा[45]च्युतः केशवो,
[46]र्हिः पुरुषोत्तमोऽब्धि[47]शयि[48]नोपेन्द्रावजेन्द्रा[49]नुजौ ।
[50]क्षसेन[51]नारायणौ जलशा[52]यो नारायणः श्रीपति-[53]
[54]रिश्च पुराण-यज्ञ-पुरुष[55]स्तार्क्ष्य[56]वनोऽधोक्षजैः ॥२१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोविन्दः[24]षड्[25]बिन्दु[26]मुकुन्दः[27]कृष्णौ[28], वैकुण्ठः[29]पद्मेशयः[30]पद्मनाभौ[31]: ।
वृषाकपिर्[32]माधव[33]वासुदेवौ[34], विश्वम्भरः[35] श्रीधर[36]विश्वरूपौ ॥२१५
दामोदरः[37] शौरि[38]सनातनौ[39] विधुः[40],
पीताम्बरो[41] मार्ज्जनि[42]नौ कुमोदकः[43] ।
त्रिविक्रमो[44] जन्हु[45]चतुर्भुजौ[46] पुन-
र्व[47]सुः[48] शतावर्त्त[49]गदाग्रजौ[50] स्वभूः[51] ॥२१६॥
मुञ्जकेशि[52]वनमालि[53]पुण्डरीकाक्ष[54]बभ्रु[55]शशबिन्दु[56]वेधसः[57] ।
पृश्निशृंग[58]धरणी[59]धरोत्तम[60]भूपाण्डव[61]यनसुवर्णबिन्दवः[62] ॥२१७॥
श्रीवत्सी[63] देवकीसूनु[64]र्गोपेन्द्रो[65] विष्टरश्रवाः[66] ।
सोमसिन्धु[67]र्जगन्नाथो, गोवर्द्धन[68]धरोऽपि च ॥२१८॥
यदुनाथो गदा-शार्ङ्ग-चक्र-श्रीवत्स-शङ्ख-भृत् ।
मैधुधेनुक[69]चाणूर[70]पूतना[71]यमलार्ज्जुनाः[72] ॥२१९॥
कालनेमि[73]हयग्रीव[74]शकटारि[75]ष्ठकैटभाः[76] ।
कंसकेशि[77]मुराः[78] साल्व[79]मेन्द्रद्विविद[80]रा[81]हवः[82] ॥२२०॥
हिरण्यकशिपु[83]र्बाणः[84], कालीयो[85] नरको[86] बलिः[87] ।
शिशुपाल[88]श्चास्य वध्या, वैनतेय[89]स्तु वाहनम् ॥२२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शङ्खोऽस्य पाञ्चजन्योऽङ्कः श्रीवत्सोऽस्मिंस्तु नन्दकः[१] ।
गदा कौमोदकी चापं शार्ङ्गं चक्रं सुदर्शनः[२] ॥२२२॥

मणिः स्यमन्तको हस्ते, भुजमध्ये तु कौस्तुभः[३] ।
वसुदेवो भूकश्यपो, दिन्दुरानकदुन्दुभिः ॥२२३॥

रामो हली मुसलिसात्वतकामपालाः
सङ्कर्षणः प्रियमधुर्बलरौहिणेयौ ।
रुक्मिप्रलम्बयमुनाभिदनन्ततालः
लक्ष्मैककुण्डलसितासित-रेवतीशाः ॥२२४॥

बलदेवो बलभद्रो नीलवस्त्रोऽच्युताग्रजः ।
मुशलं त्वस्य सौनन्दं हलं संवर्तकाह्वयम् ॥२२५॥

लक्ष्मीः पद्मा रमा या मा, तां सा श्रीः कमलेन्दिरा ।
हरिप्रिया पद्मवासा, क्षीरोदतनयाऽपि च ॥२२६॥

पद्मनो जरामीहरनङ्गमन्मथौ
कमनः कलाकेलिरनन्यजोऽङ्गजः ।

---

०१ श्रीवत्सस्तु विष्णुहृदये रोम्णो दक्षिणावर्त्तः । ०२ वाचस्पतिस्तु चक्रं सुदर्शनोऽस्त्रियामित्याह । ०३ अत्र श्लोके या अस्य, ई, आ, इति छेदः, ई अत्र धवयोगादिति ङी प्रत्ययः, आ त्ययं आवन्तो गङ्गावत् । या इत्यखंडमपि, तथा च विश्वशम्भुः या रमामातृष्विति " ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मधुदीपेमारौ[10] मधुसारथिस्मरौ
विषमायुधो दर्पककामहृच्छयौः ॥२२७॥
प्रद्युम्नः श्रीनन्दनश्च, कन्दर्पः पुष्पकेतनः ।
पुष्पाण्यस्त्रेषुचापास्त्राण्यरौ शम्बरशूर्पकौ ॥२२८॥
केतनं मीनमकरौ, बाणाः पञ्च रतिः प्रिया ।
मनःशृङ्गारसङ्कल्पात्मानो योनिः सुहृन्मधुः ॥ २२९ ॥
सुतोऽनिरुद्धे ऋष्याङ्के, उषेशो ब्रह्मसूश्च सः ।
गरुडः शाल्मल्यरुणावरजो विष्णुवाहनम् ॥२३०॥
सौपर्णेयो वैनतेयः सुपर्णः
सर्पारातिर्वज्रजिद्वज्रतुण्डः ।
पक्षिस्वामी काश्यपिः स्वर्णकायः-
स्तार्क्ष्यः कामायुर्गरुत्मान् सुधाहृत ॥२३१॥
बुद्धस्तु सुगतो धर्मधातुस्त्रिकालविज्जिनः ।
बोधिसत्त्वो महाबोधिराद्यः शास्ता तथागतः ॥२३२॥
पञ्चज्ञानैः षडभिज्ञो, दशाहो दशभूमिगैः
चतुस्त्रिंशज्जातकज्ञो, दशपारमिताधरः ॥२३३॥
द्वादशाक्षो दशबलस्त्रिकायः श्रीघनाह्वयौ ।
समन्तभद्रः सङ्गुप्तो, दयाकूर्चो विनायकः ॥२३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मार-लोक-ख-जिद्धर्म्मरागो विज्ञानमातृकः ।
महामैत्रो मुनीन्द्रश्च, बुद्धाः स्युः सप्त ते त्वमी ॥२३५॥
विपश्यी शिखी विश्वभूः, ककुच्छन्दश्च काञ्चनः ।
काश्यपश्च सप्तमस्तु, शाक्यसिंहोऽर्कबान्धवः ॥२३६॥
तथा राहुलसूः सर्वार्थसिद्धो गौतमान्वयः ।
माया-शुद्धोदन-सुतो, देवदत्ताप्रजश्च सः ॥२३७॥
असुरौ दितिदनुजौः, पातालौकैःसुरारयः ।
पूर्व्वदेवाः शुक्रशिष्याः, विद्यादेव्यस्तु षोडश ॥२३८॥
रोहिणी प्रज्ञप्तिर्वज्रशृङ्खला कुलिशाङ्कुशाः ।
चक्रेश्वरी नरदत्ता, काल्यथासौ महापरा ॥२३९॥
गौरी गान्धारी सर्वास्त्रमहाज्वाला च मानवी ।
वैरोट्याऽच्छुप्ता मानसी, महामानसिकेति ताः ॥२४०॥
वाग् ब्राह्मी भारती गौर्गीर्वाणी भाषा सरस्वती ।
श्रुतदेवी वचनं तु व्याहारो भाषितं वचः ॥२४१॥
स्पष्टविशेषणमाख्यातं, वाक्यं स्त्याद्यन्तकं पदम् ।
पदसिद्धकृतेभ्योऽन्ते, आप्तोक्तिः समयागमौ ॥२४२॥
आचाराङ्गं सूत्रकृतं, स्थानाङ्गं समवाययुक् ।
भगवत्यङ्गं, ज्ञाताधर्म्मकथापि च ॥२४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपासकाऽन्तकृद्दनुत्तरोपपातिकाद्दशाः ।
प्रश्नव्याकरणं चैव, विपाकश्रुतमेव च ॥२४४॥
इत्येकादश सोपाङ्गान्यङ्गानि द्वादशं पुनः ।
दृष्टिवादो द्वादशाऽङ्गी, स्याद्गणिपिटकाह्वयः ॥२४५॥
परिकर्म्म- सूत्रै-पूर्वानुयोगै-पूर्वगतै-चूलिकाः पञ्च ।
स्युर्दृष्टिवादभेदाः पूर्वाणि चतुर्दशापि पूर्वगते ॥२४६॥
उत्पादपूर्वमाग्रायणीयमथ वीर्य्यतः प्रवादं स्यात् ।
अस्तेर्ज्ञानोत्सत्यात्तदात्मनः कर्म्मणश्च परम् ॥२४७॥
प्रत्याख्यानं विद्याप्रवाद-कल्याण-नामधेये च ।
प्राणावायं च क्रियाविशालमथ लोकबिन्दुसारमिति ।२४८
स्वाध्यायः श्रुतिराम्नायश्छन्दो वेदस्त्रयी पुनः ।
ऋग्यजुःसामवेदा. स्युरथर्वा तु तदुद्धृतिः ॥२४९॥
वेदान्तः स्यादुपनिषदोङ्कारप्रणवौ समौ ।
शिक्षा कल्पो व्याकरणं, छन्दो ज्योतिर्निरुक्तयः ॥२५०॥
षडङ्गानि धर्मशास्त्रं, स्यात् स्मृतिर्धर्म्मसंहिता ।
आन्वीक्षिकी तर्कविद्या, मीमांसा तु विचारणा ॥२५१॥
सर्गश्च प्रतिसर्गश्च, वंशो मन्वन्तराणि च ।
वंशानुवंशचरितं, पुराणं पञ्चलक्षणम् ॥२५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षडङ्गी वेदाश्चत्वारो, मीमांसाऽन्वीक्षिकी[12] तथा ।
धर्मशास्त्रं पुराणं च, विद्या एताश्चतुर्दश ॥२९३॥
सूत्रं सूचनकृद्गौण्यं सूत्रोक्तार्थप्रपञ्चकम् ।
प्रस्तावेस्तु प्रकरणं, निरुक्तं पदभञ्जनम् ॥२९४॥
अवान्तरप्रकरणविश्रामे शीघ्रपाठतः ।
आह्निकमधिकरणन्त्वेकन्यायोपपादनम् ॥२९५॥
उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम् ।
टीका निरन्तरव्याख्या, पञ्जिका पदभञ्जिका ॥२९६॥
निबन्धवृत्ती अन्वर्थे, संग्रहस्तु समाहृतिः ।
परिशिष्टपदत्यौदार्ये, पथाऽनेन समुन्नयेत् ॥२९७॥
कारिका तु स्वल्पवृत्तौ, बहोरर्थस्य सूचनी ।
कलिन्दिका सर्वविद्या, निघण्टुर्नामसङ्ग्रहः ॥२९८॥
इतिहासैः पुरावृत्तं, प्रवह्लिका प्रहेलिका ।
जनश्रुतिः किंवदन्ती, वार्त्तेतिह्यं पुरातनी ॥२९९॥

---

०१ अवान्तरप्रकरणानां विश्रामो ग्रन्थावयव इत्यर्थः । तदाह्निकमित्युच्यते, यदनेकार्थः "आह्निकं स्यात्पुनरहर्निर्वर्त्ये नित्यकर्मणि । भोजने ग्रन्थभागे चेति " ग्रन्थभागे-ग्रन्थावयवे इति टीका । ०२ आदिग्रहणात् अध्यायः उच्छ्वासः अङ्कः सर्गः इत्यादयो ग्रन्थावयवविशेषा ज्ञेयाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तोऽथाह्वयोऽभिधा ।
गोत्रसंज्ञानामधेयाख्याह्वाऽभिख्या च नाम च ॥२६०॥
सम्बोधनमामन्त्रणमाह्वानं त्वभिमन्त्रणम् ।
आकारणं ह्वयो हूतिः, संहूतिर्बहुभिः कृता ॥२६१॥
उदाहारः उपोद्घातः, उपन्यासश्च वाङ्मुखम् ।
व्यवहारो विवादः स्यात्, शपथः शपनं शपः ॥२६२॥
उत्तरं तु प्रतिवचः, प्रश्नः पृच्छानुयोजनम् ।
कथङ्कथिकता चाथ, देवप्रश्न उपश्रुतिः ॥२६३॥
चटु चाटु प्रियप्रायं, प्रियसत्यं तु सूनृतम् ॥
सत्यं सम्यक् समीचीनममृतं तथ्यं यथातथम् ॥२६४॥
यथास्थितं च सद्भूतेऽलीके तु वितथानृते ।
अथ क्लिष्टं सङ्कुलं च, परस्परपराहतम् ॥२६५॥
सान्त्वं सुमधुरं ग्राम्यमश्लीलं म्लिष्टमस्फुटम् ।
लुप्तवर्णपदं ग्रस्तमवाच्यं स्यादनक्षरम् ॥२६६॥
अम्बूकृतं सथूत्कारे, निरस्तं त्वरयोदितम् ।
आम्रेडितं द्विस्त्रिरुक्तमबद्धं तु निरर्थकम् ॥२६७॥
पृष्ठमांसादनं तद्यत्, परोक्षे दोषकीर्त्तनम् ।
मिथ्याभियोगोऽभ्याख्यानं, सङ्गतं हृदयङ्गमम् ॥२६८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परुषं निष्ठुरं रूक्षं, विक्रुष्टमथ घोषणा ।
उच्चैर्घुष्टं वर्णनेडा, स्तवः स्तोत्रं स्तुतिर्नुतिः ॥२६९॥

श्लाघा प्रशंसाऽर्थवादः, सा तु मिथ्या विकत्थनम् ।
जनप्रवादः कौलीनं, विगानं वचनीयता ॥२७०॥

स्यादवर्ण उपक्रोशो, वादो निष्पर्यपात् परः ।
गर्हणा धिक्क्रियाऽऽ निन्दा, कुत्सा क्षेपो जुगुप्सनम् ॥२७१॥

आक्रोशाभीषङ्गाक्षेपाः, शापः स क्षारणा रते ।
विरुद्धशंसनं गालिराशीर्मङ्गलशंसनम् ॥ २७२ ॥

श्लोकः कीर्तिर्यशोऽभिख्या, समाज्ञा रुशती पुनः ।
अशुभा वाक् शुभा कल्या चर्चरा चर्भटी समे ॥२७३॥

यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ।
आपृच्छोऽऽलापः सम्भाषोऽनुलापः स्यान्मुहुर्वचः ॥२७४॥

अनर्थकं तु प्रलापो, विलापः परिदेवनम् ।
उल्लापः काकुवागन्योऽन्योक्तिः संलापसंकथे ॥२७५॥

विप्रलापो विरुद्धोक्तिरपलापस्तु निह्नवः ।
सन्देशहारः सुवचनं, सन्देशवाक्तु वाचिकम् ॥२७६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आज्ञा[1] शिष्टिर्निराङ्[2]निभ्यो देशो[3] नियोगः[4]शासने[5] ।
अवर्वादोऽप्यथाहूय प्रेषणं प्रतिशासनम् ॥२७७॥

संवित्[1]सन्धा[2]ऽऽ[3]थाऽभ्युपायैः, संप्रत्याङ्भ्यः परः श्रवैः[4] ।
अङ्गीकारोऽभ्युपगमैः[5], प्रतिज्ञा[6]ऽऽगू[7]श्च सङ्गरैः[8] ॥२७८॥

गीतनृत्यवाद्यत्रयं, नाट्यं तौर्य्यत्रिकं च[1] तत् ।
सङ्गीतं[2] प्रेक्षणार्थेऽस्मिन्[3], शास्त्रोक्ते नाट्यधर्मिका[4] ॥२७९॥

गीतं[1] गानं[2] गेयं[3] गीतिर्गान्धर्वम[4]थ नर्त्तनम्[5] ।
नटनं[1] नृत्यं[2] नृत्तं[3] च, लास्यं[4] नाट्यं[5] च ताण्डवम्[6] ॥२८०॥

मण्डलेन तु यन्नृत्यं, स्त्रीणां हल्लीसकं[1] हि तत् ।
पानगोष्ठ्यामुच्चताल[1], रणे वीरनयन्तिका[2] ॥२८१॥

स्थानं नाट्यस्य रङ्गः[1] स्यात्पूर्वरङ्ग उपक्रमः[2] ।
अङ्गहारोऽङ्गविक्षेपो[1], व्यङ्गकोऽभिनयः[2] समौ ॥२८२॥

स चतुर्विध आहार्य्यो[1] रचितो भूषणादिना ।
वचसा वाचिकोऽङ्गेनाङ्गिकः[2] सत्त्वेन सात्त्विकः[3] ॥२८३॥

स्यान्नाटकं[1] प्रकरणं[2], भाणः[3] प्रहसनं[4] डिमः[5] ।
व्यायोगसमवकारौ[6], वीथ्यङ्कौ[7] हामृगा[8] इति[9] ॥२८४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिनेयप्रकाराः स्युर्भाषाः षट् संस्कृतादिकाः ।
भारती[1] सात्वती[2] कौशिक्यारभट्यौ[3] च[4] वृत्तयः ॥२८५॥

वाद्यं[1] वादित्रमातोद्यं[2], तूर्य्यं[3] तूरं[4] स्मरध्वजः[5] ।
ततं[1] वीणाप्रभृतिकं, तालप्रभृतिकं घनं[2] ॥२८६॥

वंशादिकं तु शुषिरं[1] मानद्धं[2] मुरजादिकम् ।
वीणा[1] पुनर्घोषवती[2], विपञ्ची[3] कण्ठकूणिका[4] ॥२८७॥

वल्लकी[1] साऽथ तन्त्रीभिः, सप्तभिः परिवादिनी[2] ।
शिवस्य वीणा नालम्बी[1], सरस्वत्यास्तु कच्छपी[2] ॥२८८॥

नारदस्य तु महती[1] गणानां तु प्रभावती[2] ।
विश्वावसोस्तु बृहती[1], तुम्बुरोस्तु कलावती[2] ॥२८९॥

चण्डालानां तु कटोलवीणा[1] चाण्डालिका[2] च सा ।
कायः कोलम्बकैस्तस्या, उपनाहो[1] निबन्धनम् ॥२९०॥

दण्डः पुनः प्रवालैः स्यात्ककुम्भस्तु[1] प्रसेवकैः[2] ।
मूले वंशशलाका[1] स्यात्कलिका[2] कूणिका[3]पि च ॥२९१॥

कालस्य क्रियया मानं, तालः साम्यं पुनर्लयैः ।
द्रुतं[1] विलम्बितं[2] मध्यमो[3]घस्तत्त्वं[4] घनं[5] क्रमात् ॥२९२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृदङ्गो[1] मुरजः[2] सोऽङ्क्यौ[1]लिङ्गयौ[2]र्ध्वके[3] इति त्रिधा ।
स्याद्यशःपटहो[1] ढक्का[1], भेरी[2] दुन्दुभिरानकः[3] ॥२९३॥

पटहोऽथ[1] शारिका[1] स्यात्कोणो[2] वीणादिवादनम् ।
शृङ्गारो[1]हास्य[2]करुणा[3], रौद्र[4]वीर[5]भयानकाः[6] ॥२९४॥

बीभत्सा[1]द्भुतशान्ताश्च, रसा भावाः पुनस्त्रिधा ।
स्थायि[1]सात्विक[2]सञ्चारि[3]भेदैः स्याद्रतिः[1] पुनः ॥२९५॥

रागो[2]ऽनुरागो[3]ऽनुरतिर्हा[4]सि[5]स्तु हसनं हसः[2] ।
घर्घरो[4] हासिका[6] हास्यं, तत्राद[1]दरदे स्मितम्[1] ॥२९६॥

वक्रोष्ठिका[2]ऽथ हसितं[1], किञ्चिद्दृष्टदरदाङ्कुरे ।
किञ्चिच्छ्रुते विहसित[1]मट्टहासो[1] महीयसि ॥२९७॥

अतिहा[1]सस्त्वनुस्यूतेऽपहासो[1]ऽकारणात्कृते ।
सोत्प्रासे त्वाच्छुरितकं[1], हसनं स्फुरदोष्ठके[1] ॥२९८॥

शोकः[1] शुक्[2] शोचनं[3] खेदः[4], क्रोधो[1] मन्युः[2] क्रुधा[3] रुषा[4] ।
कुत्[5] कोपः[6] प्रतिघो[7] रोषो[8], रुट्[9] चोत्साहः[1] प्रगल्भता[2] ।२९९।

अभियोगो[3]द्यमौ[4] प्रौढि[5]रुद्योगः[6] कियदेतिका[7] ।
अध्यवसाय[8] ऊर्ज्जो[9]ऽथ वीर्य्यं[1] सोऽतिशयान्वितः ॥३००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भयं भीर्भीतिरातङ्क, आशङ्का साध्वसं दरः ।
भिया च तच्चाहिभयं, भूपतीनां स्वपक्षजम् ॥३०१॥

अदृष्टं वह्नितोयादेर्दृष्टं स्वपरचक्रजम् ।
भयङ्करं प्रतिभयं, भीमं भीष्मं भयानकम् ॥३०२॥

भीषणं भैरवं घोरं, दारुणं च भयावहम् ।
जुगुप्सा तु घृणोऽस्य स्याद्विस्मयैश्चित्रमद्भुतम् ॥३०३॥

शोचाश्चर्यं शमः शान्तिः, शमथोपशमावपि ।
तृष्णाक्षयैः स्थायिनोऽमी, रसानां कारणं क्रमात् ॥३०४॥

स्तम्भो जाड्यं स्वेदो घर्मनिदाघौ पुलकः पुनः ।
रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम् ॥३०५॥

रोमोद्गमे उद्धुषणंमुल्लाकसनंमित्यपि ।
वरभेदस्तु कलत्वं, स्वरे कम्पस्तु वेपथुः ॥३०६॥

वर्ण्यं कालिकाऽश्रु बाष्पो नेत्राम्बु रोदनम् ।
स्वेमस्तु प्रलयैस्त्वचेष्टतेत्यष्ट सात्विकाः ॥३०७॥

तिः सन्तोषः स्वास्थ्यं स्यादाध्यानं स्मरणं स्मृतिः ।
तिर्मनीषा बुद्धिर्धीर्धिषणाज्ञप्तिचेतनाः ॥३०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिभा प्रतिपत्प्रज्ञाप्रेक्षाचिदुपलब्धयः ।
संवित्तिः शेमुषी दृष्टिः, सा मेधा धारणक्षमा ॥३०९॥

पण्डा तत्त्वानुगा मोक्षे ज्ञानं विज्ञानमन्यतः ।
शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ॥३१०॥

ऊहोऽपोहोऽर्थविज्ञानं, तत्त्वज्ञानं च धीगुणाः ।
व्रीडा लज्जा मन्दाक्षं ह्रीस्त्रपा साऽपत्रपाऽन्यतः ॥३११॥

जाड्यं मौर्ख्यं विषादोऽवसादः सादो विषण्णता ।
मदो मुन्मोहसम्मेदो, व्याधिस्त्वाधी रुजाकरः ॥३१२॥

निद्रा प्रमीला शयनं, संवेशः-स्वाप-संक्षयाः ।
नन्दीमुखी श्वासहेतिस्तन्द्रा सुप्तं तु साधिका ॥३१३॥

औत्सुक्यं रणरणकोत्कण्ठे आयल्लकौरती ।
हल्लेखोत्कलिके चाथावहित्थाकारगोपनम् ॥३१४॥

शङ्काऽनिष्टोत्प्रेक्षणं स्याच्चापलं त्वनवस्थितिः ।
आलस्यं तन्द्रा कौसीद्यं, हर्षश्चित्तप्रसत्तता ॥३१५॥

ह्लादः प्रमोदः प्रमदो, मुत्प्रीत्यामोदसम्मदाः ।
आनन्दोनन्दथू गर्वस्त्वहङ्कारोऽवलिप्तता ॥३१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्पो[1]ऽभिमानो[2] ममता[3], मानः[4] श्चित्तोन्नतिः[5] स्मयः[6] ।
स मिथोऽहमहमिका[7], या तु सम्भावनाऽऽत्मनि ॥३१७॥

दर्पात्साऽहोपुरुषिका[8], स्यादहम्पूर्विका[9] पुनः ।
अहं पूर्वमहं पूर्वमित्युग्रत्वं[10] तु चण्डता[11] ॥३१८॥

प्रबोधस्तु[12] विनिद्रत्वं[13], ग्लानिस्तु[14] बलहीनता ।
दैन्यं कार्पण्यं[15] श्रमस्तु[16], क्लमः[17] क्लेशः[18] परिश्रमः[19] ॥३१९॥

प्रयासो[20]यासः[21] व्यायामः[22], उन्मादो[23] हृच्चित्तविप्लवः[24] ।
मोहो[25] मौढ्यं[26] चिन्ता[27] ध्यानममर्षः[28] क्रोधसम्भवः ॥३२०॥

गुणो जिगीषोत्साहवांस्त्रासस्त्वाकस्मिकं[29] भयम् ।
अपस्मारः[30] स्यादावेशो, निर्वेदः[31] स्वावमाननम् ॥३२१॥

आवेगस्तु[32] त्वरिस्तूर्णिः[33], संवेगः[34] सम्भ्रमस्त्वरा[35] ।
वितर्कः[36] स्यादुन्नयनं[37], परामर्शो[38] विमर्शनम्[39] ॥३२२॥

अभ्याहारस्तर्क[40] ऊहोऽसूयान्यगुणदूषणम् ।
मृतिः[1] संस्था[2] मृत्युकालो[3], परलोकगमोऽत्ययः[4] ॥३२३॥

पञ्चत्वं[5] निधनं[6] नाशो[7], दीर्घनिद्रा निमीलनम्[8] ।
विष्टान्तोऽस्तं[9] कालधर्मोऽवसानं[10] सा तु सर्वगा ॥३२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरैको मारिस्त्रैयस्त्रिंशदमी व्यभिचारिणः ।
स्युः कारणानि कार्य्याणि, सहचारीणि यानि च ॥३२५॥

रत्यादेः स्थायिनो लोके, तानि चेत्काव्यनाट्ययोः ।
विभावा अनुभावाश्च, व्यभिचारिण एव च ॥३२६॥

व्यक्तः स तैर्विभावाद्यैः, स्थायिभावो भवेद्रसः ।
पात्राणि नाट्येऽधिकृतास्तत्तद्वेषस्तु भूमिकौ ॥३२७॥

शैलूषो भरतः सर्वकेशी भरतपुत्रकः ।
धर्म्मीपुत्रो रङ्गजायाऽऽजीवो रङ्गावतारकः ॥३२८॥

नटः कृशाश्वी शैलाली, चारणस्तु कुशीलवः ।
भ्र-भ्रु-भ्रू-भृ-परः कुंसो, नटः स्त्रीवेषधारकः ॥३२९॥

वेश्याचार्य्यः पीठमर्दः, सूत्रधारस्तु सूचकः ।
नन्दी तु पाठको नान्द्याः, पार्श्वस्थः पारिपार्श्विकः॥३३०॥

वासन्तिकः केलिकिलो, वैहासिको विदूषकः ।
प्रहासी प्रीतिदश्चाथ, पिङ्गः पल्लविको विटः ॥३३१॥

पिता त्वाबुक आवुत्त-भावुकौ भगिनीपतौ ।
भावो विद्वान् युवराजः, कुमारो भर्तृदारकः ॥३३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाला वासूर्मार्षे आर्य्यौ, देवौ भट्टारकौ नृपः ।
राष्ट्रियौ नृपतेः श्यालो, दुहिता भर्तृदारिका ॥३३३॥
देवी कृताभिषेकाऽन्या भट्टिनी गणिकाऽन्जुका ।
नीचा चेटी सखीहूतौ हण्डे हञ्जे हलाः क्रमात् ॥३३४॥
अम्बाण्यैमवय्योक्तौ, ज्यायसी तु स्वसाऽत्तिकौ ।
भर्ताऽऽर्य्यपुत्रो माताऽम्बा भदन्ताः सौगतादयः ॥३३५॥
पूज्ये तत्रभवानत्रभवांश्च भगवानपि ।
पादौ भट्टारकौ देवैः, प्रयोज्याः पूज्यनामतः ॥३३६॥

इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ
नाममालायां देवकाण्डो द्वितीयः ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिधानचिन्तामणौ ।

मर्त्यकाण्डः तृतीयः ।

मर्त्यः[1] पञ्चजनो[2] भूस्पृक्[3], पुरुषः[4] पूरुषो[5] नरः[6] ।
मनुष्यो[7] मानुषो[8] नृ[9] विट्[10], मनुजो[11] मानवः[12] पुमान्[13]॥३३७॥
बालः[1] पाकः[2] शिशुर्डिम्भः[3], पोतः[4] शावः[5] स्तनन्धयः[6] ।
पृथुकार्भोत्तानशयाः[7], क्षीरकण्ठः[8] कुमारकः[9] ॥३३८॥
शिशुत्वं शैशवं[2] बाल्यं[3], वयस्थास्तरुणो[1] युवा[2] ।
तारुण्यं यौवनं[3] वृद्धः[1], प्रवयाः[2] स्थविरो[3] जरन्[4] ॥३३९॥
जरी[5] जीर्णो[6] यातयामो[7], जीनोऽथ विस्रसो[8] जरो[9] ।
वार्द्धकं[1] स्थाविरं[2] ज्यायान्[3], वर्षीयान्[4] दशमी[5]त्यपि॥३४०॥
विद्वान्[1] सुधीः[2] कविर्विचक्षणलब्धवर्णाः[3]
ज्ञः[4] प्राप्तरूपः[5] कृतिकृष्टचभिरूपधीरः[6] ।
मेधाविकोविदविशारदसूरिदोष-
ज्ञाः[7] प्राज्ञपण्डितमनीषिबुधप्रबुद्धाः[8] ॥३४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यक्तो[22] विपश्चित्[23]सङ्ख्यावान्[24], मनी[25] प्रवीणे[1]तु शिक्षितैः।
निष्णातो[3] निपुणो[4] दक्षैः, कर्म्म-हस्त-सुखाः कृतात्।३४२॥

कुशलश्चतुरोऽभिज्ञाविज्ञवैज्ञानिकाः[12] पटुः[13]।
[14]एको विदग्धे प्रौढस्तु[2], प्रगल्भैः[3] प्रतिभान्वितैः॥३४३॥

कुशाग्रीयमतिः[1] सूक्ष्मदर्शी[2] तत्कालधीः[3] पुनः।
प्रत्युत्पन्नमतिर्दुराद्यः[1] पश्येद्दीर्घदर्श्यसौ[2] ॥३४४॥

दयालुः सहृदयैश्चिद्रूपोऽन्यथ संस्कृते।
व्युत्पन्नप्रहतौ[3]पुण्णा, अन्तर्वाणिस्तु शास्त्रवित्॥३४५॥

वागीशो[1] वाक्पतौ[2] वाग्मी[1], वाचोयुक्तिपटुः[3] प्रवाक्[4]।
मुखो वावदूकोऽथ वदो[1] वक्ता[2] वदावदैः[3] ॥३४६॥

स्याद् जल्पाकस्तु वाचालो, वाचाटो बहुगर्ह्यवाक्[4]।
भेदोऽनुत्तरे दुर्वाक्[1] कद्वदे स्यादथाधरैः ॥३४७॥

मूकादिन्येर्डमूकोनेडमूकौ[2] त्ववाक्श्रुतौ[3]।
मूकः शब्दनैस्तुल्यौ, कुवादैकुचरौ समौ ॥३४८॥

मूकोऽस्फुटवाग्[1] मूकोऽवाग्[2]सौम्यस्त्वरोऽस्वरैः[3]।
मिहिरो[2] विन्दुर्वन्दारुस्त्वभिवादकैः ॥३४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आशंसुराशंसितरि[2], कट्वरस्त्वतिकुत्सितैः[3]।
निराकरिष्णुः क्षिप्नुः[4] स्याद्विकासी तु विकस्वरः[5]॥३९०॥

दुर्मुखे मुखरोबद्धमुखौ[3] शङ्कैः[1] प्रियंवदैः[2]।
दानशीलैः[1] सदादान्यो, वदान्योऽप्यथ बालिशैः[2] ॥३९१॥

मूढो[2] मन्दो यथाजातो[4], बालो[5] मातृमुखो जडैः[1]।
मूर्खोऽमेधो[6] विवर्णाज्ञो[10], वैधेयो[11] मातृशासितः[12] ॥३९२॥

देवानांप्रियजाल्मौ[13] च, दीर्घसूत्रैश्चिरक्रियैः[2]।
मन्दः क्रियासु कुण्ठैः[3] स्यात्, क्रियावान्[4] कर्म्मसूद्यतः॥३९३

कर्म्मक्षमोऽलङ्कर्म्मीणैः[1], कर्म्मशूरस्तु कर्म्मठैः[2]।
कर्म्मशीलैः[3] कार्म्म आयःशूलिकैस्तीक्ष्णकर्म्मकृत्[4] ॥३९४॥

सिंहसंहननैः[1] स्वङ्गैः[2], स्वतन्त्रो[3] निरवग्रहैः[4]।
यथाकामी[3] स्वरुचिर्श्च, स्वच्छन्दैः[5] स्वैरैर्यपावृतः[6] ॥३९५॥

यदृच्छौ[1] स्वैरितौ स्वेच्छौ[2], नाथवान्[3] निह्नेगृह्यकौ[3]।
तन्त्रायत्तेवशाधीनैश्छन्दैवन्तैः[6] परात्परे ॥३९६॥

लक्ष्मीवान्[1] लक्ष्मणैः[2] श्लीलैः[3], इभ्यैः आढ्यो[2] धनीधनैः[3]।
ऋद्धो[5] विभूतिः[1] संपत्तिर्लक्ष्मीः[2] श्रीश्चर्द्धिसम्पदः[3]।३९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दरिद्रो दुर्विधो दुःस्थो, दुर्गतो निःस्वकीकटौ ।
अकिञ्चनोऽधिपस्त्वीशो, नेता परिवृढोऽधिभूः ॥३५८॥
पतीन्द्रस्वामिनाथार्य्याः प्रभुर्भर्त्तेश्वरो विभुः ।
ईशितेनो नायकश्च, नियोज्यः परिचारकः ॥३५९॥
डिङ्करः किङ्करो भृत्यश्चेटो गोप्यः पराचितः ।
दासः प्रेष्यः परिस्कन्दो, मुजिष्यपरिकर्म्मिणौ ॥३६०॥
पान्नैः परपिण्डोदैः, परजीतैः परैधितैः ।
भृतके भृतिभुग् वैतनिकः कर्म्मकरोऽपि च ॥३६१॥
स निर्भृतिः कर्म्मकरो, भृतिः स्यान्निष्क्रयः पणः ।
कर्म्मण्या वेतनं मूल्यं, निर्वेशो भरणं विधा ॥३६२॥
भर्म्मण्यो भर्म भृत्यो च, भोगैस्तु गणिकाभृतिः ।
कलपूः स्याद्बहुकरो, भारवाहैस्तु भारिकः ॥३६३॥
भारावहे वैवधिको, भारे विवधवीवधौ ।
कर्षः शिक्यं तदालम्बो, भारयष्टिर्विहङ्गिका ॥३६४॥
शौण्डीरभटो वीरो, विक्रान्तश्चाथ कातरः ।
शङ्कितो भीतो, भीरु-भीरुक-भीलुकाः ॥३६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विह्वस्तव्याकुलौ[१][२] व्यग्रे, कान्दिशीकौ[३] भयद्रुते ।
उत्पिञ्जलैसमुत्पिञ्जैपिञ्जलौ[४] भृशमाकुले ॥३६६॥

महेच्छे तूद्भटोदारौ[१][२][३], दान्तोदीर्णमहाशयाः[४][५][६] ।
महामनाः महात्मा च, कृपणस्तु मितम्पचैः[७] ॥३६७॥

कीनाशस्तद्धनैः[८] क्षुद्रैकदर्य्यदृढमुष्टयैः[९] ।
किम्पचानो[१०] दयालुस्तु, कृपालुः करुणापरैः[११] ॥३६८॥

सूरतोऽथ[१] दया[२] शूकः[३], कारुण्यं करुणा[४] घृणा[५] ।
कृपानुकम्पानुक्रोशौ[६][७][८], हिंस्रे शरारुघातुकौ[९][२][३] ॥३६९॥

व्यापादनं[१] विशरणं[२] प्रमयः[३] प्रमापणं[४],
निर्ग्रन्थनं[५] प्रमथनं[६] कदनं[७] निबर्हणम्[८] ।

निस्तर्हणं[९] विशसनं[१०] क्षणनं[११] परासनं[१२],
प्रोज्जासनं[१३] प्रशमनं[१४] प्रतिघातनं[१५] वधः[१६] ॥३७०॥

प्रवासनोद्वासनघातनिर्व्वासनानि[१७][१८][१९][२०] संज्ञासिनिशुम्भहिंसाः[२१][२२][२३] ।
निर्व्वापणालम्भनिसूदनानि, निर्य्यातनोन्मन्थसमापनानि[२४][२५][२६][२७][२८][२९]
॥३७१॥

हृद्यसंहं मर्मचेरं, गुणाधिष्ठानकं त्रसम् ॥१६६७॥
स्तनौ तु धरणीवध्रे, तयोः पिप्पलमेचकौ ।
जठरे मडुको रोमलतोधारोऽथ क्लोमनि ॥१६६८॥
स्यात्ताडवं क्लुपुषं क्लोमथ नाभौ पृतारिका ।
सिरामूलं कटीकूपौ, तूचलिंगौ रतोबुके ॥१६६९॥
शिश्ने तु लंगुलं शंकु, लांगूलं शेफशेफसी ।
रक्ते तु शोण्यकीलाले, मांसे तूदग्रः समारटम् ॥१६७०॥
लेपनं च रोमणि द्वु, त्वग्मलं वालपूत्रकः ।
कूपजो मांसनिर्यासः, परित्राणमथ स्नपा ॥१६७१॥
तंत्री नखोरुस्नावानः, संधिबंधनमित्यपि ।
अगुरौ प्रवरं श्रृंगं, शीर्षकं मृदुलं लघु ॥१६७२॥
वरद्रुमः परमदः, प्रकरं गंधदारु च ।
चंदने पुनरेकांगं, मद्रश्रीः फलकीत्यपि ॥१६७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातीफले सौमनसं, प्रेटकं मदशौण्डकम् ।
कोशफलं कुंकुमे तु, करटं वासनीयकम् ॥११७४॥
प्रियंगुं पीतकौवेरं, घोरं पुष्पैरजो वरम् ।
कुसुंभं च जरापुष्पं, कुसुमोन्तं च गौरवम् ॥११७५॥
वृक्षधूपे तु श्रीवेष्टो, दधिक्षीरघृताह्वयः ।
रचनायां परिस्पंदः, प्रतिपेल्लोऽथ कुंडले ॥११७६॥
कर्णादर्शो मेखला तु, लोलिनी कटिमौलिका ।
अथ किङ्किण्यां चैचरी, विद्यो विद्यामणिस्तथा ॥११७७॥
नूपुरे तु पादशीली, मंदीरं पादनौलिका ।
पादांगुलीयके पादपौलिका पादकीलिका ॥११७८॥
वस्त्रे निवसनं वस्त्रं, सन्नं कर्पटमित्यपि ।
दशासु वस्त्रपेटैयोऽथ, हिमवातापहांशुके ॥११७९॥
द्विखंडेको वरकैक्ष्य, चक्रवर्तिन्यधीश्वरः ।
अर्जुने विजयश्चित्रयोधी चित्रांगसूदनः ॥११८०॥
योगी धन्वी कृष्णपक्षो, नंदिघोषस्तु तद्रथः ।
ग्रंथिकस्तु सहदेवो, नकुलस्तंतिपालकः ॥११८१॥
माद्रेयाविमौ कौंतेयौ, भीमार्जुनयुधिष्ठिराः ।
त्रयेऽपि पांडवेयाः स्युः, पांडवाःपांडवायनाः ॥११८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्ञश्छत्रे नृपलक्ष्म, चमरैः स्यात्तु चामरे ।
स्यान्न्यायद्रष्टरि स्थेयो, द्वाःस्थो द्वाःस्थितिदर्शकः ॥१६८३॥

क्षुद्रोपकरणानां स्याद्ध्यक्षः पारिकर्मिकः ।
पुराध्यक्षे कोट्टपतिः, पौरिको दांडपाशिकः ॥१६८४॥

वेध्ये निमित्तं बाणे तु, लक्षेहा मर्म्मभेदनैः
वीरश्च वीरशंकुश्च, कौदंबोऽप्यस्त्रकंटकः ॥१६८५॥

नाराचे लोहनालोऽस्त्रसायकोऽसिस्तु सायकः ।
श्रीगर्भो विनयः शास्ता, व्यवहारः प्रजाकरः ॥१६८६॥

धर्मपालोऽक्षरो देवस्तीक्ष्णकर्म्मा दुरासदः ।
भृंगो रुद्रतनयो, मनुर्ज्येष्ठः शिवंकरैः ॥१६८७॥

करपालो विशसनस्तीक्ष्णधारो विषाग्रजः ।
धर्म्मप्रचारो धीरांगो, धाराधरैकरालिकौ ॥१६८८॥

चन्द्रभासश्च शौंडोऽथ, क्षुर्यस्त्री कोशशायिका ।
पत्रं च धेनुका पत्रपाले तु हुलमातृका ॥१६८९॥

कुट्टंती पत्रफलाऽथ, शक्तिः कासूर्महाफला ।
अष्टतालाऽऽयतौ सा च, पट्टिशस्तु खुरोपमः ॥१६९०॥

लोहदंडस्तीक्ष्णधारो, दुःस्फोटोऽऽराफलौ समौ ।
चक्रं तु वलयैप्रायमरसंचितमित्यपि ॥१६९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शतघ्नी तु चतुस्तौला, लोहकंटकैसंचिता ।
अयःकंटकसंछन्ना, शतघ्न्येव महौशिला ॥१९२॥
मुषुंण्ढी स्याद्दारुमयी, वृत्तायःकीलसंचिता ।
कर्णयो लोहमात्रोऽस्य, चिरिकी तु हुलाग्रेका ॥१९३॥
वराहकर्णकोऽन्वर्थः, फलपत्राग्रके हुलम् ।
मुनेयोऽस्त्रैशस्त्रं च, शरास्यास उपासनम् ॥१९४॥
जिष्णौ तु विजयी जैत्रः, स्यात् शृगाली तु विष्वगे ।
करमर्दये सौम्यं तीर्थमथ स्यान्नियमे तपः ॥१९५॥
सत्यवत्यां गंधवती, मत्स्योदर्यथ वक्रये ।
साटकोऽथ साक्षिणि स्यान्, मध्यस्थः प्राश्निकोऽप्यथ १९६
कूटसाक्षी मृषासाक्ष्ये, सूची स्याद् दुष्टसाक्षिणि ।
पादुकायां पादरथी, पादेनगुः पदत्त्रैरा ॥१९७॥
पादवीथी च पेशी च, पादपीठी पदायता ।
नापिते ग्रामणीर्मंडिवाहक्षौरिकभांडिकाः ॥१९८॥

इति शेषनाममालायां नरकांडस्तृतीयः

अथ पृथ्वी महाकांता, क्षांता मेर्व्वद्रिकर्णिका ।
गोत्रकीलो घनश्रेणी, मर्त्यलोका जगद्गृहा ॥१९९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देहिनी केलिनी मौलिर्महास्थौल्यं बलास्थली ।
गिरौ प्रपौती कुट्टार, उर्वगः कंदरोकरः ॥१७००॥
कैलासे धनदावासो, हरोद्रिर्हिमवद्बलः ।
मलयश्चंदनगिरिः, स्याल्लोहेऽधीनधीवरे ॥१७०१॥
ताम्रे पवित्रं कांस्यं च, सीसके तु महाबलम् ।
चीनपट्टं समोलूकं, कृष्णं च त्रपुबंधके ॥१७०२॥
त्रपुणि श्वेतरूप्यं स्यात्, शठं सलवणं रजः ।
परोसं मधुकं ज्येष्ठं, घनं च मुखभूषणम् ॥१७०३॥
रजते त्रापुषं वंगं, जीवनं वपु भीरुकम् ।
शुभ्रं सौम्यं च शोध्यं च, रूप्यं भीरुजनवीर्यसमम् ॥१७०४॥
सुवर्णे लोमनं शुक्लं, तारजीवनमौजसम् ।
दाक्षायणं रक्तवर्णं श्रीमकुंभं शिलोद्भवम् ॥१७०५॥
वैणवं तु कर्णिकारच्छायं वेणुतटीभवम् ।
जले दिव्यमिरासेव्यं, कृपीटं घृतमंकुरम् ॥१७०६॥
विषं पिप्पलपातालनलिनीनि च कंबलम् ।
पावनं पेडूसं चापि, पल्लूरं तु सितं पयः ॥१७०७॥
किट्टिमं तदतिक्षारं, शालूकं पंकगंधिकम् ।
अंबं तु कटुषं तोयमतिस्वच्छं तु कौस्तिमम् ॥१७०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुद्रे तु महाकच्छः, दारदो धरणीधरः ।
महीप्रावार उर्व्वगस्तिमिकोशो महाशयः ॥१७०९॥
मुरन्दला तु मुरला सुरवेला सुनन्दिनी ।
अर्म्मण्वती रतिनदी, संभेदः सिंधुसंगमः ॥१७१०॥
नीकाशस्तु सारणावग्नौ, वेमिर्दीप्रैः समंतैर्भुक् ।
पर्व्वरीकः पर्विवासिः, पृथुर्वर्षुरिराशिरः ॥१७११॥
जुहूराणः पृदाकुश्च, कुषाकुर्हविनो हविः ।
घृतोर्चिर्नाचिकेतश्च, पृष्ठो वंचतिरंचतिः ॥१७१२॥
मुंजिर्मरेथेपीयौ चास्त्रैनिः पवेनवाहनः ।
वायौ सुराल्लयः प्राणैः, संभृतो जलभूषणः ॥१७१३॥
शुचिर्वहो लोलवटः, पश्चिमोत्तरदिक्पतिः ।
अंकतिः क्षिपेणुर्मर्कोटः, ध्वजप्रहरणश्चलैः ॥१७१४॥
शीतलो जलकांतारो, मेघारिः सृमरोऽपिच ।
वृक्षे त्वारोहकः स्कंधी, सीमिको हरितच्छदः ॥१७१५॥
उरुर्जर्तुर्वह्निभृथ्य, स्यात्तु श्वेतैः कपर्दके ।
खद्योते तु कीटमणिर्ज्योतिर्मौली तमोमणिः ॥१७१६॥
परार्बुदो निमेषद्युत्, ध्वांतश्चित्रोऽथ कुंजरे ।
पेचकी पुष्करी पद्मी, पेचिलैः सूचिकोधरः ॥१७१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलोमजिह्मोऽनःस्वेदो,[७] महाकायो महामदः ।
सूर्पकर्णो जलौकाक्षो,[१३] जेटी च षष्टिहायनः ॥१७१८॥
असुरो दीर्घपर्वणः, शुंडालः[१४] कपिरित्यपि ।
वशायां वासितौ कर्णघारिणी गणिका(कणिका)पिच ॥१९॥
अश्वे तु क्रमणः कुण्डी, प्रोथी हेषी प्रकीर्णकः ।
पाल्कः पर्णलः किण्वी, कुटेरः सिंहविक्रमः ॥१७२०॥
[११] [१२] [१३]
माषाशी केसरी हंसो, मुहुर्मुग् गूढभोजनः ।
वासुदेवः शालिहोत्रो, लक्ष्मीपुत्रो मरुद्भयः ॥१७२१॥
चामर्ट्यकशफोऽपि स्यादश्वायां पूनरर्वती ।
मल्लिकाक्षः सितैनेत्रैः, स्याद्वाजीद्वीयुधोऽसितैः ॥१७२२॥
कर्कुदी ककुदावर्त्तो, निर्मुष्कस्त्वद्रिवृद्धिकः ।
शुनि क्रोधी रसापायी, शिवारिः सूचको रुरुः ॥१७२३॥
वनेचरः स्वजातिद्विट्, कृतज्ञो भल्लहश्च सः ।
दीर्घनादः पुरोगामी, स्यादिद्मभहकामुकः ॥१७२४॥
मंडलः कपिलो ग्राममृगश्चेद्गमहोऽपिच ।
महिषे कलुषः पिंगः, कटाहो गद्गदस्वरः ॥१७२५॥
हरिणैः स्कंधशृंगश्च, सिंहे तु स्यात्पलंकषः ।
शैलोटो वनराजश्च, नखःक्रांतो गणेश्वरः ॥१७२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृंगोष्णीषो रक्तकंबिहो व्यादीर्णास्यः सुगंधिकेः ।
शूकरे कुमुखः कामरूपी च सलिलप्रियः ॥१७२७॥
तलेक्षणो वक्रदंष्ट्रः, पंककीडनकोऽपिच ।
मृगे त्वजिनयोनिः स्यादथो भुजगभोजिनि ॥१७२८॥
अहीरणीर्द्विमुखश्च, भवेत् पक्षिणि चंचुमान् ।
कंठाग्निः कीकसमुखो, लोमकी रसनारदः ॥१७२९॥
वारणनाडीचरणौ, मयूरे चित्रपिंगलः ।
नृत्यप्रियः स्थिरमदः, खिलखिल्लो गरवतः ॥१७३०॥
मार्जारकंठो मरूको, मेघनादानुलासकः ।
मयूको बहुलग्रीवो, नगावासश्च चंद्रकी ॥१७३१॥
कोकिले तु मदोल्लापी, काकजातो रतोद्वहः ।
मधुघोषो मधुकंठः, सुधाकंठः कुहूमुखः ॥१७३२॥
घोषयित्नुः पोषयित्नुः, कामतालः कुनालिकेः ।
कुक्कुटे तु दीर्घनादः, चर्मचूडो नखायुधः ॥१७३३॥
मयूरचटकः शौंडो, रणेच्छुश्च कलाधिकः ।
आरणी विष्किरो बोधिनंदीकःपृष्टिवर्धनः ॥१७३४॥
चित्रवाजो महायोगी, स्वस्तिको मणिकंठकः ।
उषाकीलो विशोकश्च, वाजस्तु ग्रामकुक्कुटः ॥१७३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हंसेषु तु मरालाः स्युः, सारसे दीर्घजानुकः ।
मोनर्दी मैथुनी कामी, श्येनोक्षो रक्तमस्तकः ॥१७३६॥
गृध्रे तु पुरुषव्याघ्रः, कामायुः कुणितेक्षणः ।
सुदर्शनः शकुन्याञ्जौ, शुके तु प्रियदर्शकः ॥१७३७॥
श्रीमान् मेधातिथिर्वाग्मी, मत्स्ये तु जलपिप्पकः ।
मूको जलाशयः शेवः, सहस्रदंष्ट्रस्त्वेतनः ॥१७३८॥
जलवालो वदालोऽथ, पाठीने मृदुपाठकः ।

इति शेषसंग्रहनाममालायां चतुर्थकांडः ॥

अथ रत्नप्रभा घर्मा, वंशा तु शर्कराप्रभा ॥१७३९॥
स्याद्वालुकाप्रभा शैला, भवेत्पंकप्रभाऽजना ।
धूमप्रभा पुना रिष्टा, माघव्या तु तमःप्रभा ॥१७४०॥
महातमप्रभा माघवीत्येवं नरकभूमयः ।

इति नारककांडः पंचमः ॥ ५ ॥

आनुकूल्यार्थकं प्राच्चैमसाकल्ये तु चिच्चनै ॥१७४१॥
तु हि च स्म ह वै पादपूरणे पूजने स्वती ।
वद् वा यथा तथैवैवं, साम्येऽहो ही च विस्मये॥१७४२॥
स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः ।
ॐ पृच्छायामतीते प्राक्, निश्चयेऽद्धांजसा द्वयम् ॥१७४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतो हेतौ महः प्रत्यारंभेऽथ स्वयमात्मनि ।
प्रशंसने तु सुष्ठु स्यात्, परश्वः श्वेः परेऽहनि ॥१७४४॥

अद्यात्राह्नयथ पूर्वेऽह्नीत्यादौ पूर्वेद्युरादयः ।
समानेऽहनि सद्यः स्यात्, परे त्वह्नि परेद्यवि ॥१७४५॥

उभयद्युस्तूभयेद्युः, समे युगपदेकदा ।
स्यात्तदानीं तदा तर्हि, यदा यर्ह्यन्यदैकदा ॥१७४६॥

परुत्परार्यैषमोऽब्दे, पूर्वे पूर्वतरेऽत्र च ।
प्रकारेऽन्यथेतरथा, कथमित्थं यथा तथा ॥१७४७॥

द्विधा द्वेधा त्रिधा त्रेधा, चतुर्द्धा द्वैधमादि च ।
द्विस्त्रिश्चतुःपंचकृत्व, इत्याद्यावर्त्तने कृते ॥१७४८॥

दिग्देशकाले पूर्वादौ, प्रागुदक्प्रत्यगादयः ।
अव्ययानामनंतत्वाद्दिङ्मात्रमिह दर्शितम् ॥१७४९॥

इयंत इति संख्याने, निपातानां न विद्यते ।
प्रयोजनवशादेते, निपात्यंते पदे पदे ॥१७५०॥

इत्याचार्यश्रीहेमचंद्रविरचिता शेषनाममाला ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ श्रीमज्जिनदेवमुनीश्वरविरचितः
शिलोञ्छः

अर्हं बीजं नमस्कृत्य, गुरूणामुपदेशतः ।
श्रीहैमनाममालायाः, शिलोञ्छैः क्रियते मया ॥१७९१॥

सर्वीयै इत्यपि जिने, संभवैः शंभवेऽपि च ।
श्रीसुव्रते मुनिरैपि, नेमौ नेमीत्यपीष्यते ॥१७९२॥

षष्ठे गणेशे मण्डितपुत्रोऽपि कथ्यते बुधैः ।
मरुदेव्यैपि विज्ञेया, युगादिजिनमातरि ॥१७९३॥

चक्रेश्वर्य्यामप्रतिचक्रोऽप्यजितापि कविभिरजितबलौ ।
श्यामा त्वच्युतदेव्यपि सुतारिकोक्ता सुतारापि ॥१७९४॥

भद्रेकृद्भद्रकरोऽपि, श्रमणः श्रवणोऽपि च ।
भद्रंभद्रमपि प्राहुः, प्रशस्तमपि कोविदाः ॥१७९५॥

प्रव्रज्याऽपि परिव्रज्या, शिष्योऽन्तेषदैपि स्मृतः ।
इति प्रथमकाण्डस्य, शिलोञ्छोऽयं समर्थितः ॥१७९६॥

---

(१) शिलोञ्छो नाम उपात्तशस्यात् क्षेत्रात् शेषावचयनं, तद्वदत्रापि हैमनाममालायाः अवशेषशब्दावचयनं कृतम् । (२) 'भद्रोऽपि' इत्यभिधानचिन्तामणिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्योमयानंमपि प्रोक्तं, विमानं बुधपुङ्गवैः ।
स्यात्समुद्रनवनीतं, पियूषमपि चामृतम् ॥१७५७॥
कथ्यन्ते व्यन्तरा वानमन्तरा अपि सूरिभिः ।
द्योतैस्तथा पृष्णिमृष्णी[1],प्रोक्ता रश्म्यभिधायकाः॥१७५८
समुद्रनवनीतं च, विदुश्चन्द्रमसं बुधाः ।
चन्द्रिका चन्द्रिमाऽपि स्यादिल्वला इन्वकौ अपि॥१७५९
अनुराधाऽप्यनूराधा, गुरुः सप्तर्षिजोऽपि[2] च ।
सौरिः सौरोऽपि राहुस्तु, ग्रहकल्लोल इत्यपि ॥१७६०॥
अभ्रपिशाचोऽपि तथा, नाडिका नालिकाऽपि च ।
रात्रौ यामवतीतुङ्गयौ, निःसंपातौ निशीथवत् ॥१७६१॥
तमः स्यादन्धतमसं,[1] वर्षाः स्युर्वरिषा अपि ।
खेऽन्तरीक्षं सांसृष्टकमपि तत्कालजे फले ॥१७६२॥
मेघमाला कालिकाऽपि, वार्दलं चापि दुर्दिने ।
सूत्रामायीन्द्रे शतारः, शतधारोऽपि चाशनौ ॥१७६३॥
आश्विनेयौ स्वर्गवैद्यौ, हर्यक्षोऽपि धनाधिपे ।
अजगवमजगावमपि शाङ्गरधन्वनि ॥१७६४॥

---

१ 'पृष्णिरित्यन्ये' इत्यभिधानचिन्तामणिः । २ 'बाहुलका-दीर्घत्वे' अन्धातमसमित्यपि' इत्यभिधानचिन्तामणिः । ३ सूत्रा-मायी इनंतः शशिवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौर्यां दाक्षायणीश्चर्यौ[1], नारायणे जलेशयैः ।
कौमोदकी कौपोदकी[1], औ ई शब्दौ श्रियां मतौ॥१७६९

कन्दुः कन्दर्पे सिद्धौर्थः, सुगते परिकीर्त्तितः ।
अङ्गे व्याख्याविवाहाभ्यां, प्रज्ञैस्सिरपि पञ्चमे ॥१७६६॥

दृष्टिपातो[1] द्वादशाङ्क्यां, कल्याणेऽनन्द्यमप्यथ ।
निंदौ गर्हा जुगुप्सायां, क्षारेणा रतिगालिषु ॥१७६७॥

समाख्यापि[1] समाज्ञावद्वुशतीवद्वुशत्यपि ।
काल्याऽपि कल्यौ संघायां, समाधिरपि कथ्यते॥१७६८॥

व्रीडैः सूकौ मन्दाक्षैश्च, ह्रियामूहाऽपि चोहवत् ।
तन्द्रिस्तैन्द्री च निद्रायामहंप्रथमिकापि च ॥१७६९॥

अहंपूर्विकायां केलीकीलोऽपि[1] स्याद्विदूषके ।
मौर्षवन्मौरिषोऽगीति, शिलोञ्छो देवकाण्डगः ॥१७७०॥

स्तनन्धये स्तनपैश्च, क्षीरपैश्चाभिधीयते ।
तारुण्यं स्याद्यौवनिकौ, दशमीस्थो जरत्तरैः ॥१७७१॥

कवितापि कविः स्यात् तत्कर्मणि कृतैकृत्यकृतिकृतार्थाश्च ।
कुटिलाशयोऽपि कुचरोऽन्धजडशठेष्वप्यनेडमूकस्तु।१७७२

---

१ ' अहमग्रिका च '

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैदान्यौ[1] पृथगित्यन्ये, दानशीलप्रियंवदौ[1] ।
मूर्खे यथोद्धतोऽपीभ्ये, श्रीमानेपि बुधैः स्मृतः ॥१७७३॥

विवधकैवीवधिकावेपि वैवधिके प्रतिचैरोऽपि भृत्ये स्यात् ।
संमार्जको[1] बहुकरे बहुषान्याऽर्जके इतीष्यते च परैः॥१७७४

विहङ्गिकायां च विहङ्गिमोऽप्यथौर्द्धदेहिके ।
और्द्धदैहिकमप्याहुरनौ शण्ठे इत्यपि ॥१७७५॥

मायाविमायिकौ[2] धूर्ते, कपटे तूपधा मता ।
चौरश्चोरोऽपि विज्ञेयः, स्तेयं स्तैन्यमपीष्यते ॥१७७६॥

दाने प्रादेशनेमपि, क्षमा स्यात् क्षान्तिरित्यपि ।
क्रोधनः कोपनस्तृष्णक्, पिपासितोऽपि कथ्यते॥१७७७॥

भक्षकः स्यादाशितोऽपि, मर्जितापि च मार्जितौ ।
पेयूषमेपि पीयूषं, कूर्चिकापि च कूर्चिका ॥१७७८॥

द्रप्से द्रप्स्यमपि प्रोक्तं, विजिपिठं[1] च पिच्छिले ।
व्योषे त्रिकटुकं जग्धौ, जग्धं[1] जग्धं[2] तथा ॥१७७९॥

आघ्राणोऽपि भवेत्तृप्तौ, शौष्कलैः पिशिताशिनि ।
मनोराज्यमनोगव्यावपि स्यातां मनोरथे ॥१७८०॥

---

१ 'दानशीलप्रियवाचौ वदान्यौ पृथक्' इत्यभिधानचिन्तामणिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कामुके कमनो[1]ऽपि स्यादाक्षारितोऽपि[2] दूषिते ।
संशयालुः सांशयिकी[3], जागरितापि जागरी ॥१७८१॥
पूजितेऽपचायितोऽपि[4], तुन्दिमोदरिकौवपि ।
तुन्दिले न्युब्जोऽपि कुब्जे, खलतोऽप्यैन्द्रलुप्तिके॥१७८२
पामरोऽपि कच्छुरोऽतीसारक्यप्यतिसारकी ।
कुण्डूतिरपि खर्जूतिर्विस्फोटः पिटके स्मृतः ॥१७८३॥
कोढे मण्डलकेऽपि, गुदकीलोऽपि वाऽर्शसि ।
मेहः प्रमेहवदायुर्वेदकोऽपि चिकित्सके ॥१७८४॥
आयुष्मानपि दीर्घायुः, कथ्यतेऽथ परीक्षकः ।
स्यादाक्षपाटलिकोऽपि[5], पारिषद्योऽपि[6] सम्भवत्॥१७८५
स्युर्नैमित्तिकनैमित्तमौहूर्त्तौ गणके लिपौ ।
लिखितोऽपि मषी मेला, कुलिके कुलकोऽपि च ॥१७८६
अष्टापदे बुधैः शारिफलकोऽपि निगद्यते ।
मनोज्ञवैस्तातुल्ये, प्रभविष्णुरपि क्षमे ॥१७८७॥
जाङ्घिके जङ्घाकरोऽपि[7], चानुगोऽप्यनुगामिनि ।
पर्य्येषणोपासनोऽपि, शुश्रूषायामधीयते ॥१७८८॥

---

१ 'कुण्ठयत्यङ्गम्' इत्यभिधानचिन्तामणिस्थव्युत्पत्त्या द्वितीयान्तं लभ्यते । २ 'आयुर्वेदिकः' इत्यभिधानचिन्तामणिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आतिथ्योऽप्यतिथौ तुल्येऽभिजो[1] गोत्रे तु सन्ततिः[2] ।
महेला[1] योषिता[2] च स्त्री, तरुणी युवतीत्यपि ॥१७८९॥
सुवासिनी चरिण्टी[1] च, चिरण्टी[2] च चरण्ट्यपि[3] ।
वधूट्यां पत्न्यां करात्तौ[1], गेहिनी[2] सहधर्मिणी[3] ॥१७९०॥
सधर्मचारिणी चापि, स्नुषायां तु वधूट्यपि ।
प्रेमवत्यपि कान्तायां, प्राणिग्रहो[1] विवोढरि ॥१७९१॥
परिणेतोपयन्ता[1] च, यौतके दायं इत्यपि ।
दिधीषूर्दिधिषूर्जीवत्पत्नी जीवत्पतिः[1] समे ॥१७९२॥
तुल्ये अवीरा[1]निर्वीरे[2], श्रवणा[1]श्रवणे[2] तथा ।
रण्डापि विधवा पुष्पवती स्यात्पुष्पितापि च ॥ १७९३॥
पुष्पे कुसुममप्युक्तं, पशुधर्मोऽपि मोहने ।
सहोदरे सगर्भोऽपि, स्यादग्रजवदग्रिमैः ॥१७९४॥
शण्ठः शठः पण्डुरोऽपि, क्लीबो माता जनित्र्यपि ।
चिहुरा[1] अपि केशाः स्युः, कर्णः शब्दग्रहोऽपि च ॥९५॥
नेत्रं विलोचनमपि, शृङ्गाणी सृक्कणी अपि ।
दाढिका[1] द्राढिकापि स्यात्कपोलस्तु कफोणिवत् ॥९६॥
कूर्परे कूर्परः सिंहतले संहतलोऽपि च ।
चक्षुष्कोऽपि[1] चलौ मुष्के, स्यादाण्डः पेलकोऽपि[2] च॥९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पैत्पादैड्घ्रश्च चरणे, कीकसं हड्डमित्यपि ।
कपालं शकलमपि, पृष्ठास्थनि कशारुकौ ॥१७९८॥
मज्जायामस्थितेजोऽपि[1], नाडीषु नाडिनाटिके[2] ।
सिङ्घाणकोऽपि सिङ्घाणः, स्तृणीकौ स्तृणिकौपि च॥१९९॥
शान्तः घातिषश्च विड्गूथेऽशुचिवेशोऽपि[1] वेषवत् ।
उत्सादनोच्छादने च, प्लवप्लावौ[2] तथा समौ[3] ॥१८००॥
वंशाकं कृमिजग्धं चागरौ स्यादथ वाह्लिकम् ।
सङ्कोचं पिशुनं वर्ण्यमसृक्पङ्के च कुङ्कुमे ॥१८०१॥
जापके कालानुसार्य्यौ, यावनोऽपि च सिह्लके ।
मकुटोऽपि[1] कोटीरे, चित्रकश्च विशेषके ॥१८०२॥
वर्तसोऽप्यवर्तसे स्यात्पत्रभंग्यां तु वल्लरी[1] ।
मञ्जरी[2] च पत्रात्पारितथ्यौ पर्य्यवतथ्यया ॥१८०३॥
कर्णान्दुरपि कर्णान्दुः, परिहार्य्येऽपि कङ्कणः ।
किङ्कणी[1] किङ्किणी तुल्ये, आच्छादौच्छादने[2] समे
कूर्पासेऽप्यङ्गिका कक्षापटे कक्षापुटोऽपि[1] च ।
कुथे वर्णपरिस्तोमै इत्यमरखण्डं नमुः परे ॥१८०५॥

---

१ 'सृणीका, सृणिका' इत्यभिधानचिन्तामणिः । २ 'आप्लवाप्लावौ' इत्यभिधान० । ३ पत्रमञ्जरी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रास्तरणेमिति च पल्यङ्कोऽप्यवसक्थिकौ ।
यमन्यैपि प्रतिसीरा, संस्तरः प्रस्तरोऽपि च ॥१८०६॥
पतद्ग्राहेप्रतिग्राहावपि स्यातां पतद्ग्रहे ।
मकुरोऽप्यात्मदर्शोऽथ, कशिपुः कैसिपुः समौ ॥१८०७॥
यावकौलक्तकौ[2] यावे, तुल्ये व्यजनवीजने[2] ।
गीरीयको[1] गिरिकोऽपि, बालक्रीडनके मतौ ॥१८०८॥
गण्डकोऽपि गन्दुको[1] राट्टे, मूर्द्धाविसिक्ते इत्यपि ।
भरतः सर्वदमनोऽप्यथ दाशरथीवुभौ ॥१८०९॥
रामचन्द्रोरामभद्रौ[2], हनुमानपि मारुतौ ।
वालौ सुग्रीवाग्रजोऽपि[1], पार्थे बीभत्सुरित्यपि ॥१८१०॥
सातवाहनवत्सालवाहनोऽपि[1] प्रकीर्त्तितः ।
परिच्छदे परिजनैः, परिवर्कणमित्यपि ॥१८११॥
मन्त्री बुद्धिसहायोऽपि[1], वेत्री वेत्रधरोऽपि[1] च ।
हेमाध्यक्षे हैरिकोऽपि[1], टंकपतिस्तु नैष्किके ॥१८१२॥
शुद्धान्ताध्यक्ष आन्तर्वेशिकोऽन्तःपुरिकोऽपि ।
सहायेसाक्षपदीनौ[2], सख्यावसुहृदप्यगौ ॥१८१३॥
नये नीतिरपि स्कन्धावारेऽपि शिबिरो मतः ।
जयन्त्यैपि वैजयन्त्यां, पताकोपि प्रकीर्त्यते ॥१८१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्वजः पताकादण्डोऽपि, झम्फानं याप्ययानवत् ।
सादी[1] सव्येष्टोऽपि सूते, कवचितोऽपि वर्म्मिते ॥१८१५॥
कवचं दंशनं त्वक्रं[2], तनुत्राणमपि स्मृतम् ।
अधियोगं धियोगं चाधिकाङ्गवदुदाहृतम् ॥१८१६॥
शिरस्कं खोलमप्याहुः, स्यान्निषङ्गश्चैषु तूणिनि ।
चापे धनूर्धनुःशरासनान्यपि विदुर्बुधाः ॥१८१७॥
फरकस्फरकौ खेटे, क्षुरिका छुरिका छुरी ।
इत्म्यां तरवालिकोपि, परिघः पलिघैः समौ ॥१८१८॥
उर्णस्न्युर्णस्नावा मेषो, मेषो बोधकरोऽर्थिकः ।
सौखशायनिकैः सौख्यशय्यिकौ सौखसुप्तिके ॥१८१९॥
रणे संस्फेटसंफेटौ, बले द्रविणमूर्क् तथा ।
अवस्कन्दोऽपि धाट्यां स्यान्नशने च पलायने ॥१८२०॥
चारकोऽपि भवेद् गुप्तौ, तापसे तु तपस्यपि ।
विप्रे ब्रह्मोऽपि चाग्नीधाऽऽग्नीध्रोऽप्यथ वृषी वृसी[1] ॥१८२१॥
शासने शमने चाथ, दधि प्राज्यं पृषातके ।
अग्निहोत्र्यग्न्याहितोऽप्यथोपवासे समाविमौ ॥१८२२॥

---

१ 'मरुखः' इत्यभिधानचिन्तामणौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपवस्त्रमौपवस्त्रमुपवीते प्रचक्षते ।
ब्रह्मसूत्रं पवित्रञ्च, वाल्मीकौ द्वाविमावपि ॥१८२३॥
मौत्रावरुण्यादिकवी[२], पर्शुरामोऽपि[३] भार्गवे ।
योगीशो याज्ञवल्क्योऽपि, दाक्षीपुत्रोऽपि[४] पाणिनौ॥२४॥
स्फोटायनः स्फौटायनैः, कात्यो[५] वररुचौ तथा ।
कारेणवैः पालकाप्ये, चाणक्यश्चणकात्मजे ॥१८२५॥
वैशेषिके कणादोऽपि, जैनोऽनैकान्तवाद्यपि ।
चार्वाके लौकायतिकः, कृषिः प्रसृतमित्यपि ॥१८२६॥
न्यासार्पणे परिदानं, वणिक् प्रापणिकैः स्मृतः ।
अयुते नियुतं[६] पोते, स्मृतं प्रवहणं[७] बुधैः ॥१८२७॥
कणोऽपारित्रे दुर्गस्य, गवेश्वरोऽपि गोमति[८] ।
कर्षके क्षेत्रजीवोऽपि, कोटीशो[९] लोष्टभेदनः ॥१८२८॥
मार्द्वीकेऽपि मद्येऽनुतर्षोऽपि चषके स्मृतः ।
कुविन्दे तन्त्रवायोऽपि, वेमा व्योमापि कीर्त्यते ॥१८२९॥
रजको धावकोऽप्युक्तः, पादत्राणञ्च पादुका ।
तैलिकस्तैलंतुदोऽपि, रथकारोऽपि वर्द्धकिः[१०] ॥१८३०॥

---

(१) ' प्रसृतः ' इत्यभिधानचिन्तामणौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्रकारो लेखकश्च, लेपकूलेपकोऽपि च ।
कुतूहले विनोदोऽपि, सौनिकः खट्टिकोऽपि च ॥१८३१॥
कूटयन्त्रे पाशयन्त्रं, समौ चाण्डालपुष्कसौ ।
इत्थं तृतीयकाण्डस्य, शिलोञ्छोऽयं समर्थितः ॥१८३२॥
रत्नवती भुवि दिवस्पृथिव्यावपि रोदसी ।
माणिबन्धं माणिमंतं, सैन्धवे वसुके वसु ॥१८३३॥
टङ्कनष्टङ्कणे उपावर्त्तने चापि नीवृति ।
जङ्गलः स्याज्जाङ्गलोऽपि, मालवन्मालको मतः ॥१८३४॥
पत्तने पट्टनेऽपि, कुण्डिने कुण्डिनापुरम् ।
स्यात्कुण्डिनपुरेऽपि, विपणौ पण्यवीथिकौ ॥१८३५॥
सुरङ्गायां सन्धिरपि, गृहे धामेऽपि स्मृतम् ।
उपकार्य्योपकार्य्यापि, प्रासादे च प्रसादनैः ॥१८३६॥
शान्तीगृहं शान्तिगृहे, प्राङ्गणं त्वङ्गणं मतम् ।
कपाटवत्कवाटोऽपि, पक्षद्वारे खडङ्किका ॥१८३७॥
कुसूलवत्कुसूलोऽपि, सम्पुटे पुटं इत्यपि ।
पेटायां स्यात्पेटकोऽपि, पेडापि कृतिनां मते॥१८३८॥
षवन्यैऽपि समूहिन्यामयोनिं मुसलं विदुः ।
कण्डोलके पिटकोऽपि, चूल्यामन्तीति कथ्यते ॥१८३९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खनैः खजाकोऽपि[2] मथि, विष्कम्भैः कटकोऽस्य तु ।
अगोऽपि[1] पर्वते क्रौञ्चैः, क्रोञ्चवन्नन्यते बुधैः ॥१८४०॥
कखट्यैपि खटिन्यां स्यात्ताम्रमौदुम्बरं विदुः ।
शातकुम्भमैपि स्वर्णं, पारदश्चपलोऽपि च ॥१८४१॥
रसजातं[1] रसाढ्यं च, तुत्थे दार्वीरसोद्भवे ।
गौरिके वैष्णवोऽपि स्याद्गोपित्ते[1] हरितालने ॥१८४२॥
मनःशिलायां नेपाली[1], शिलौ च सुधियां मता ।
शृङ्गारेऽपि सिन्दूरे, कुरुविन्दे तु हिङ्गुलैः ॥१८४३॥
बोलो[1] गोपरसोऽप्युक्तो, रत्नं माणिक्यमित्यपि ।
पद्मरागे शोणिरत्नं[1], वैराटो[1] राजपट्टवत् ॥१८४४॥
नीले मणौ महानीलं[1], कमन्धमपि वारिणि ।
धूमिको धूम्रमहिषो[2], धूमर्यो[3] मिहिकाः समाः ॥१८४५॥
अकूपारोऽपि[1] जलधौ, मकरालय इत्यपि ।
निम्नगायां ह्रादिनी[1] स्याज्जह्नुकन्यापि जाह्नवी ॥४६॥
कलिन्दपुत्री कालिन्दी[1], रेवा मेकलकन्यका ।
चान्द्रभागा चन्द्रभागा, गोमती गोमतीत्यपि ॥१८४७॥
चक्राण्यपि पुटभेदाः, पङ्के चिखल इत्यपि ।
उद्द्योतनोद्घाटने[2] च, घटोयन्त्रे प्रकीर्तिते ॥१८४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरस्तडागैस्तटाकोऽप्यथ तल्लेऽथ पल्वले ।
आशयैाशशुष्मैर्बर्हि[3]र्बर्हिरुत्थदमूनैसः ॥१८४९॥
अग्नौ क्षणप्रभौ विद्युद्वन्हवाहैसदागती[2] ।
वायौ चरणपेऽपि द्वैस्त्वकै त्वचौ स्तबके पुनः ॥१८५०॥
गुलुञ्छैलुञ्छचौ माकैन्दरसालौवपि चूतवत् ।
किङ्करातै कुरण्टकैकुरुण्डकावैपि स्मृतौ ॥१८५१॥
कर्कन्धूरपि कर्कन्धौ, ह्रस्वादिश्चाटरूषकैः ।
वाशैा च स्नुहिः स्नुहौऽपि, पियालोऽपि[1] प्रियालवत् ॥
॥१८५२॥
नार्य्यङ्गोऽपि च नारङ्गोऽक्षे विभेदकै इत्यपि ।
भवेत्तमालस्तापिच्छो[1], निर्गुण्डी सिन्दुवारैवत् ॥१८५३॥
जपा जवौ मातुलुङ्गो, मातुलिङ्गोऽपि कीर्त्तितः ।
धत्तूर इव धुत्तूरो, वंशस्त्वकूसारै इत्यपि ॥१८५४॥
ह्रीवेरं केशसलिलपर्य्यायैः समर्च्यते बुधैः ।
पङ्कजिन्यां कमलिनी,[1] कुमुदिनी[1] कुमुद्वती ॥१८५५॥
बिसप्रसूनं कमले, कुमुत्कुमुदवन्मतम् ।
शेपालै च जलनीली, सातीनोऽपि सतीनवत् ॥१८५६॥
कुल्मासवत्कुल्माषोऽपि, गवेधुकौ गवीधुकौ ।
कणिशं कनिशं रिढे, धान्ये त्वावासितं[1] मतम् १८५७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हालाहलं हालहेलं, मुस्तायां मुस्तकोऽपि च ।
कृमिः किमिरपि गण्डूपदः किंचुल्लकोऽपि च ॥१८५८॥
शम्बुका अपि शम्बूका, वृश्चिको द्रुत इत्यपि ।
मसलो मधुकरोलिः, पिको विक्कः करिः करी ॥१८५९॥
व्यालो व्याडोऽप्यौपवाह्योऽप्युपवह्योऽपरा वरी ।
शृङ्खले निगलोऽण्डुश्च, कक्षा कक्ष्यौपि वाह्लिके ॥१८६०॥
वाह्लीकोऽपि वल्गवागे, खलिनेच्छ खलीनवत् ।
मौर्योऽभृष्टे गोपतौ तु, शंल इत्वरे इत्यपि ॥१८६१॥
स्थौरी स्थूर्यपि ककुदे, ककुत्ककुदमित्यपि ।
नैचिकं नैचिकी च स्यान्मलिनी बालगर्भिणी ॥१८६२॥
पवित्रं गोमये छागे, शुभोऽथ मषकः शुनि ।
सैरभो देवशुन्यां च, यमरथोऽपि सैरिभे ॥१८६३॥
पारिन्द्र इव पारीन्द्रैः, शरभेऽष्टापदोऽपि च ।
सृगालवच्छृगालोऽपि, प्लवगः प्लवगोऽपि च ॥१८६४॥
वानायुरपि वातायुरुन्दुरोऽपि च मूषके ।
ह्रीकुर्वनबिडालोऽपि, गोकर्णोऽपि भुजङ्गमे ॥१८६५॥
जलव्यालेऽलीगर्दोऽपि, शेषः स्यादेककुण्डलः ।
आशीराशी च दंष्ट्रायां, निर्मोके निलयन्यपि ॥१८६६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतत्री[1] पतत्रिरपि, पिच्छं पिञ्छमपि स्मृतम् ।
परपुष्टोऽन्यभृतौ[2] च, पिके बर्हिणि बर्हिणैः ॥१८६७॥

वायसे बलिपुष्टोऽपि, द्रोणोऽपि[3] द्रोणकाकवत् ।
सारसा लक्ष्मणी[4] कौञ्चा, क्रुञ्चौ चाषे दिविःकिकी[5]॥१८६८

किकिदीविरपि प्रोक्तष्टिट्टिभे टीटिभोऽपि च ।
कलविङ्के कुलिङ्गोऽपि, दात्यूहे कालकण्ठकः[6] ॥१८६९॥

दात्यूहोऽपि बलाका च, बकेरुर्विसकण्ठिकौ[7] ।
मेषाख्येऽपि शुके तैलपायिकायां निशाटनी[8] ॥१८७०॥

कपोते पारावतोऽपि, मत्स्ये मच्छोऽथ तन्तुणे ।
स्मृतो वरुणपाशोऽपि, नक्रे शङ्कुमुखोऽपि च ॥१८७१॥

उद्धारैः कूर्मा इत्येष, तिर्य्यक्काण्डः शिलोञ्छितः ।
नारकास्तु नैरयिकाः[9], पाताले तु तुलं[10] रसौ ॥१८७२॥

इति पञ्चमकाण्डस्य, शिलोञ्छोऽयं समर्थितः ।
जीवोऽपि चेतने जन्तौ, प्राणी जन्मोऽपि जन्मनि १८७३

जीवातुर्जीविते ऽथायुः, पुंस्युदन्तोऽपि चायुषि ।
सङ्कल्पे स्याद्विकल्पोऽपि, मनो नेन्द्रियमप्यथ ॥१८७४॥

शर्म[11] सौख्यं पीडा बाधा, चर्चा चर्चोऽपि कथ्यते ।
विप्रतीसारोऽनुशयेऽर्थार्थौ अपीन्द्रियार्थवत् ॥१८७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुसीमस्तु सुषीमोऽपि[1], कक्खटे खक्कटोऽपि च ।
जठे जरठोऽम्लेऽम्लो[2], रावो रव इव स्मृतः ॥१८७६॥

निषादो निषधो[3] गर्जो, गर्जा[4] मेद्रोऽपि मन्द्रवत् ।
आकरो[5] निकरे युग्मे, जकुटोऽथ कनीयसि ॥१८७७॥

कनिष्ठं विग्रहः शब्दप्रपञ्चे निखिले पुनः ।
स्यान्निःशेषमनूनञ्च, खण्डलेऽपि खण्डवत् ॥१८७८॥

मलीमसे कल्मषं च, निकृष्टे याम्येरेपसी[2] ।
लडहं[6] रमणीयं[2] च, रम्ये नित्ये सदातनम् ॥१८७९॥

शाश्वतिकं[6] च नेदीयं[2], इत्यन्तिकतमे स्मृतम् ।
एकाकिन्यवगणोऽपि, प्रागेप्यादौ प्रकीर्तितम् ॥१८८०॥

मध्यमे मध्यंदिनं[6] च, निरर्गलेऽनर्गले ।
बहुरूपेपृथग्रूपेनानाविधाः पृथग्विधे ॥१८८१॥

झम्पा झम्पोऽथ छन्ने स्याच्छादितं[1] पिहितेऽपि च ।
प्रकाशिते प्राकृष्कृतमवज्ञायामसूक्ष्मणम् ॥१८८२॥

बुधैरवमाननाऽवगणने[3] अपि कीर्त्तिते ।
अन्दोलनेऽपि प्रेंखाऽथोदस्तमप्युदञ्चितम् ॥१८८३॥

भिदा भिच्चोदितेऽपीरितेऽथाङ्गीकृते पुनः ।
कक्षीकृतं स्वीकृतं[2] च, छिन्ने छातेऽपि स्मृतम् ॥१८८४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्ते विज्ञे विस्मृते च, मवेत्प्रस्मृतमित्यपि ।
अटाटोऽट्यैः पर्य्यटनैमानुपूर्व्यमनुक्रमे ॥१८८५॥
परीरम्भोऽपि[1] संश्लेषे, स्यादुद्भ्रान्तोऽप्युपक्रमे ।
जातो जातमपि स्पर्द्धा, सङ्घर्षोऽप्यथ विक्रिया ॥१८८६॥
विकारो[2] विकृतिश्चापि, विलम्बस्तु समर्पणे ।
दिष्ट्या समुपजोषं[3] सर्वदा सदा सनत[4] सनात्[5] ॥१८८७॥
निर्भरे च स्वैती[6] हेतौ, येन[7] तेन[8] च कीर्त्तितौ ।
अहो[9] सम्बोधनेऽपीति, षष्ठः काण्डः शिलोञ्छितः १८८८
वैक्रमेऽब्दत्रिवस्विन्दुमिते (१८३१) राधाद्यवत्सरौ ।
ग्रन्थोऽयं दृब्धमे श्रीमज्जिनदेवमुनीश्वरैः ॥१८८९॥

॥ इति श्रीजिनदेवसूरिदृब्धः शिलोञ्छः ॥

इति श्री हेमचन्द्राचार्यदृब्धे नाममालाशेषमाले
श्रीजिनदेवसूत्रितः शिलोञ्छश्च समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीहेमचन्द्राचार्यविरचितो

निघण्टुशेषः ।

विहितैकार्थनानार्थदेश्यशब्दसमुच्चयः ।
निघण्टुशेषं वक्ष्येऽहं, नत्वाऽर्हत्पादकञ्जम् ॥ १८९०
..... ।
..... ॥ १८९१
..... ।
..... ॥ १८९२
..... ।
..... ॥ १८९३
..... ।
..... ॥ १८९४
..... ।
..... ॥ १८९५
..... ।
..... ॥ १८९६
..... ।
..... ॥ १८९७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

..... ।
..... ॥ १८९८
..... ।
..... ॥ १८९९
..... ।
..... ॥ १९००
..... ।
..... ॥ १९०१
..... ।
..... ॥ १९०२
..... ।
..... ॥ १९०३
..... ।
..... ॥ १९०४
..... ।
..... ॥ १९०५
.....वं, बीजं भद्रयवाह्वयम् ।
शिरीषे विषाणभंडी, भंडीरः शंखिनीफलः ॥ १९०६
मृदुपुष्पः शुकपुष्पः, शुकवृक्षः शुकप्रियः ।
कपीतनः कर्णपूरो, भण्डिलः श्यामवल्कलः ॥ १९०७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाटल्यां पाटला स्थाल्यमोघा तोयाधिवासिनी ।
वसन्तकामयोर्दूती, कुम्भिका कालवृन्तिका ॥ १९०८
अन्यस्यां तत्र तु श्वेता, पाटला काष्ठपाटला ।
शीतला श्वेतकुम्भीका, कुबेराक्षी फलेरुहा ॥ १९०९
अगुरावगुरुर्लोहं, वंशिकं विश्वरूपकम् ।
कृमिजं प्रवरं राजार्हं, स्याद् योगजमनार्यकम् ॥ १९१०
मल्लिगन्धेऽत्र मल्लिका, कृष्णे तु काकतुण्डकः ।
श्रीखण्डे स्यान्मलयजं, चन्दनं श्वेतचन्दनम् ॥ १९११
गोशीर्षकं गन्धसारं, भद्रश्रीस्तैलपर्णिकम् ।
फलकी सुरभिः सारं, महार्हं रोहणोद्भवम् ॥ १९१२
अथ बर्बरके श्वेतं, निर्गन्धं बर्बरोद्भवम् ।
स्याद्रक्तचन्दने क्षुद्रचन्दनं भास्करप्रियम् ॥ १९१३
ताम्रसारं रक्तसारं, लोहितं हरिचन्दनम् ।
कुचन्दने तु पत्राङ्गं, पत्त(त्र)ङ्गं पट्टरञ्जनम् ॥ १९१४
सुरङ्गकं रक्तकाष्ठं, पत्तूरं तिलपर्णिका ।
अथ द्रुमोत्पलव्याधः, परिव्याधः सुगन्धकः ॥ १९१५
निर्गन्धेऽस्मिन् कर्णिकारो, निधीथः पीतपुष्पकः ।
पुंनागे तु महान्नागः, केसरो रक्तकेसरः ॥ १९१६
देववल्लभकुम्भीकौ, तुङ्गः पुरुषनामकः ।
अथागस्त्ये वङ्गसेनः, शुकनासो मुनिद्रुमः ॥ १९१७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करवीरे कणवीरः, श्वेतपुष्पोऽश्वमारकः ।
प्रतिहासः शतप्राशोऽश्वारोहः कुमुदोद्भवः ॥ १९१८
रक्तपुष्पेऽत्र लगुडश्चण्डातश्चण्डगुल्मकौ ।
कालस्कन्धस्तमाले स्यात्तापिच्छो रञ्जतो बसुः ॥ १९१९
तमालपत्रे वस्त्राख्यं, रोमशं तामसं दलम् ।
सूक्ष्मैलायां चन्द्रबाला, द्राविडी निष्कुटिस्त्रुटिः ॥ १९२०
कपोतवर्णिका तुच्छा, कोरङ्गी बहुला तुला ।
स्थूलैलायां बृहदेला, पत्रैला त्वक्सुगन्धिका ॥ १९२१
त्रिदिवोद्भवा पृथ्वीका, कर्णिका त्रिपुटा पुटा ।
कर्पूरे घनसारः स्याद्धिमाह्वो हिमवालुकः ॥ १९२२
सिताभ्रः शीतलरजः, स्फटिकश्चन्द्रनामकः ।
कङ्कोलके कटुफलं, कोमलं मागधोत्थितम् ॥ १९२३
कोलं कोषफलं कोरं, मारीचं द्वीपमित्यपि ।
लवङ्गे शिखरं दिव्यं, भृङ्गारं वारिजं लवम् ॥ १९२४
श्रीपुष्पं श्र्याह्वयं देवपुष्पं चन्दनपुष्पकम् ।
नलिकायां कपोताङ्घ्रिर्निर्मध्या शुषिरा नटी ॥ १९२५
धमन्यञ्जनकेशी च, शून्या विद्रुमवल्लपि ।
अतिमुक्ते मुण्डकः स्यात्पुण्ड्रको भ्रमरोत्सवः ॥ १९२६
पराश्रयः सुवासन्ती, कामुको माधवी लता ।
पिप्पले बोधिरश्वत्थः, श्रीवृक्षश्चलपत्रकः ॥ १९२७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मञ्जल्यः केशवावासः, श्यामलो द्विरदाशनः ।
गर्दभाण्डे कन्दरालश्छायावृक्षः कमण्डलुः ॥ १९२८
प्लक्षो वटप्लवः शुङ्गी, सुपार्श्वश्चारुदर्शनः ।
कपीतने कपीनः स्यात्पीतनप्लवकावपि ॥ १९२९
कर्पटोऽपर्कटी प्लक्षः, सतीदो लक्षणे नटी ।
वटे वैश्रवणावासो, न्यग्रोधो बहुपाद्भवः ॥ १९३०
स्कन्धजन्मारक्तफलः, क्षीरी शुङ्गी वनस्पतिः ।
उदुम्बरे जन्तुफलो, यज्ञाङ्गो हेमदुग्धकः ॥ १९३१
सदाफलो वसुवृक्षः, श्वेतवल्को मशक्यपि ।
काकोदुम्बरिकायां तु, फाल्गुनी फल्गुवाटिका ॥ १९३२
फलराजी मलभारी, फलयूर्जघनेफला ।
राजादने तु राजन्या, क्षीरिका प्रियदर्शनः ॥ १९३३
कपिप्रियो दृढस्कन्धो, मधुराजफलो नृपः ।
प्रियाले तु राजवृक्षो, बहुवल्को धनुष्पुटः ॥ १९३४
सन्नकद्रुः खरस्कन्धश्चारस्तापसवल्लभः ।
आम्रातके वर्षपाकी, कपिचूतः कपिप्रियः ॥ १९३५
कपीतनः पीतनकस्तनुक्षीरोऽभ्रपाटकः ।
शुङ्गी कपिरसाढ्यः स्वादुष्पकलो बिम्बीषणः ॥ १९३६
अर्के विकीरणोऽर्काह्वो ज्यंभला स्फोतविच्छुरा ।
क्षीरार्कपर्णो राजार्के, त्वलर्को गणरूपकः ॥ १९३७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकाष्ठीलः सदापुष्पो, मन्दारश्च प्रतापसः ।
त्रुट्यां वज्रो महावृक्षोऽसिपत्रः क्षक्षुधा गुडा ॥ १९३८
समन्तदुग्धा सीहुण्डा, शण्डेरी वक्रकण्टकः ।
क्रकरर्दे करमन्दः, कराम्रकसुषेणकौ ॥ १९३९
स्थलपर्केट आविम्रः, कृष्णपाकफलोऽपि च ।
जम्बीरे जम्भलो जम्भो, जम्भीलो दन्तहर्षणः ॥ १९४०
वक्रशोधी दन्तशठो, गम्भीरो रोचनोऽपि च ।
करुणे तु छागलाख्यो, मल्लिकाकुसुमः प्रियः ॥ १९४१
बीजपूरे बीजपूर्णः, पूरकः फलपूरकः ।
सुपूरको मातुलुङ्गः, केसराम्लोऽम्लकेसरः ॥ १९४२
वराम्लो बीजको लुङ्गो, रुचको मध्यकेसरः ।
कृमिघ्नो गन्धकुसुमः, केसरी साधुपादपः ॥ १९४३
मातुलुङ्गी वर्धमाना, मधुरा मधुकुक्कुटी ।
मधुवल्ली पूतिपुष्पा, देवदूती महाबला ॥ १९४४
आम्लिकायां चुक्रिकाम्ला, शुक्तिकाम्ली विकाम्लिका ।
चुक्रा चिञ्चा तिन्तिडीका, तिन्तिला गुरुपुष्पिका ॥ १९४५
वृक्षाम्ले स्यादम्लवृक्षस्तिन्तिडीको महीरुहः ।
शाकाम्लमम्लशाकं चाम्लपूरो रक्तपूरकः ॥ १९४६
अथाम्लवेतसे भीमो, भेदनो रक्तपूरकः ।
रुधिरस्रावकश्चुक्रं, मांसारिर्वानिकप्रियः ॥ १९४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शाखाम्लो वेतसोऽम्लोऽम्लस्तिन्तिडीको रसाम्लकः ।
स शङ्खद्रावको हीनो, लौहद्रावक उत्तमः ॥ १९४८
तावेव तु शतवेधिसहस्रवेधिनौ क्रमात् ।
कपित्थे वानरावासो, गन्धपत्रः कपिप्रियः ॥ १९४९
पुष्पफलो दधिफलो, दधित्थग्राहिमन्मथाः ।
अक्षिस्यंदो दन्तशठो, राजाम्रश्चिरपाक्यपि ॥ १९५०
अश्मन्तके श्लक्ष्णपत्रः, पाषाणावूक इन्द्रकः ।
अम्लपत्रस्ताम्रपत्रः, कुशली यमलच्छदः ॥ १९५१
नारङ्गे स्यान्नागरङ्गस्त्वक्सुगन्धो मुखप्रियः ।
ऐरावतो योगसारो, योगी तक्राधिवासनः ॥ १९५२
खदिरे स्याद्रक्तसारः, कण्टकी दन्तधावनः ।
गायत्री बालपत्रश्च, जिह्वाशल्यं क्षितिक्षमः ॥ १९५३
सिते तु तत्र कदरः, कार्मुकः कुब्जकण्टकः ।
सोमवल्को नेमिवृक्षः, श्यामसारः पथिद्रुमः ॥ १९५४
विट्खदिरे त्विरिमिदो, गोधास्कन्धोऽरिमेदकः ।
अरिमारोऽरिमः पूत्यरिमेदो मुखशोधनः ॥ १९५५
शाल्मलौ तूलिनी मोचा, पिच्छिला विरजा विता ।
कुक्कुटी पूरणी रक्तकुसुमा घुणवल्लभा ॥ १९५६
कण्टकाढ्याऽनलफली, पिच्छा तु तस्य वेष्टकः ।
कुशाल्मलौ शाल्मलिका, रोचनः कूटशाल्मलिः ॥ १९५७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिंशिपायां महाश्यामा, पिच्छिला पाण्डुरच्छदा ।
कृष्णसाराऽङ्गारवर्णा, गुरुरल्पा तु शिंशिपा ॥ १९५८
कुशिंशिपा भस्मगर्भा, कपिला भस्मपिङ्गला ।
बदर्यां कुवलिः कोलिः, कर्कन्धुः फेनिलच्छदा ॥ १९५९
राष्ट्रवृद्धिकरी कोली, सौवीरी वज्रशिल्पिका ।
घुटा घोण्टा कोपघोण्टा, व्याघ्रगृध्रनखीत्यपि ॥ १९६०
शम्यां सक्तुफला लक्ष्मीः, शिवा तुङ्गाऽग्निपादपः ।
अजप्रिया भस्मकाष्ठा, शंकरः शिवकीलिका ॥ १९६१
शिवलोमा यतफला, लोमपामविनाशिनी ।
मङ्गल्या शुचिपत्रा च, फले तस्यास्तु साङ्गरः ॥ १९६२
इङ्गुद्यां तापसतरुर्भार्जारः कण्टकीटकः ।
बिन्दुकस्तिक्तमज्जा च, पूतिपुष्पफलोऽपि च ॥ १९६३
गुग्गुलौ तु पुरो दुर्गो, महिषाक्षः पलङ्कषः ।
जटायुः कालनिर्यासो, वासवोलूकनामकः ॥ १९६४
नक्तंचरः शिवधूपः, कुम्भोलूखलकः शिवः ।
पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥ १९६५
करीरे स्यात्तीक्ष्णसारः, शाकपुष्पो मृदुः फलः ।
मरुजन्मा गूढपत्रो, ग्रन्थिलकरावपि ॥ १९६६
विकङ्कते खुवावृक्षो, ग्रन्थिलः स्वादुकण्टकः ।
केकणिः काकपादश्च, व्याघ्रपादोऽपकण्टकः ॥ १९६७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बिल्वे महाफलः श्र्याद्वः, शलाटुः पूतिमारुतः ।
महाकपित्थं शाण्डिल्यः, शैलूषो नीलमल्लिका ॥ १९६८
श्रीवासः श्रीफलो ह्रद्यगन्धो मालूरकर्कटौ ।
हरीतक्यां जया पथ्या, हैमवत्यभयाऽमृता ॥ १९६९
कायस्था पूतना चेतक्यन्यथा श्रेयसी शिवा ।
बिभीतके भूतवासो, वासन्तोऽक्षो वहेडकः ॥ १९७०
संवर्तकः कर्षफलः, कल्को हार्यः कलिद्रुमः ।
कर्षो दैत्यो मधुबीजो, धर्मद्वेषी बिभेदकः ॥ १९७१
आमलक्यां शिवा धात्री, वयस्था षड्रसाऽमृता ।
पर्वकाल्या तिष्यफला, माकन्दी श्रीफला च सा ॥ १९७२
अरणावग्निमन्थः स्यात्तर्कारी वैजयन्तिका ।
जया जयन्ती श्रीपर्णी, कर्णिका गणिकारिका ॥ १९७३
तेजोमन्थो हविर्मन्थो, नादेयी वह्निशोधनः ।
अरलो दुन्दको दीर्घवृन्तानतः कुटंनटः ॥ १९७४
श्योनाकः शोषणो जम्बुः, शुकनासः कुटंभरः ।
मयूरजङ्घः कट्वङ्गः, सल्लकः प्रियजीवकः ॥ १९७५
मण्डूकपर्णः पत्रोर्णो, गोपवृक्षो मुनिद्रुमः ।
शिग्रौ शोभाञ्जनस्तीक्ष्णगन्धो मूलकपल्लवः ॥ १९७६
विद्रध्यरातिः काक्षीवो, मुखभञ्जः सुभञ्जनः ।
दृशोऽक्षीवः सुरञ्जी च, मोचको मधुगूञ्जनः ॥ १९७७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वेतेऽत्र श्वेतमरिचो, रक्ते तु मधुशिग्रुकः ।
तिनिशे रथकूबेमिर्वञ्जुलो रथसाधकः ॥ १९७८
दीर्घवृक्षश्चक्रकरो, रथनामातिमुक्तकः ।
अश्मगर्भः सर्वसारः, क्रमसंधारणोऽपि च ॥ १९७९
पलाशे किंशुकः पर्णः, खरपर्णस्त्रिपत्रकः ।
त्रिवृन्ताख्यो रक्तपुष्पो, बीजस्नेहः समिद्वरः ॥ १९८०
क्षारश्रेष्ठो वातपोथो, याज्ञिको ब्रह्मपादपः ।
धवे भारोद्वहो गौरः, सकटाक्षो धुरंधरः ॥ १९८१
कुलावो नन्दिनश्चापि, सितः कृष्णश्च स द्विधा ।
श्रीपर्ण्यां काश्मरी कृष्णा, वृन्तिका मधुपर्णिका ॥ १९८२
गम्भारी सर्वतोभद्रा, कट्फला भद्रपर्णिका ।
विहारी कुमुदाहारी, महाकुम्भी च कश्मरी ॥ १९८३
नित्यभद्रा महाभद्रा, काश्मर्यो मधुमत्यपि ।
सप्तच्छदे शुक्तिपर्णो, गुच्छः पुष्पः सुवर्णकः ॥ १९८४
स्थूलपर्णो दीपवृक्षः शारदो विषमच्छदः ।
मदगन्धिर्विशालत्वग्गजद्विट् शाल्मलीदलः ॥ १९८५
शिरोरुर्गेहविटपः, सुमनो ग्रहनाशनः ।
आरग्वधे कृतमालः, कर्णिकारः सुवर्णकः ॥ १९८६
पीतपुष्पो दीर्घफलः, शम्पाकश्चतुरङ्गुलः ।
व्याधिहा रेवतः स्थूलः, प्रग्रहो राजपादपः ॥ १९८७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोग्यशिम्बिका कर्णी, स्वर्णशेफालिकेत्यपि ।
बीजके प्रियकः शौरिर्गौरो बन्धूकपुष्पकः ॥ १९८८
कृष्णसर्जो महासर्जः, कल्याणः पीतरोऽसनः ।
महाशालः पीतशालो, जीवकः प्रियशालकः ॥ १९८९
सुगन्धिर्नीलनिर्यासस्तिष्यः पुष्पोऽलकप्रियः ।
स तु द्विधा शिखिग्रीवः, श्रेष्ठो गोमूत्रगन्धकः ॥ १९९०
अश्वकर्णे दीर्घपत्रः, कषायः सस्यसंवरः ।
सर्जकः शर्जकः शूरः, कार्श्यशालो लतातरुः ॥ १९९१
अर्जुने ककुभः सेव्यः, सुवर्णो धूर्तपादपः ।
देवशाकः शक्रतरुर्नदीसर्जोऽर्जुनाभिधः ॥ १९९२
शाके कोलफलो द्वारदारुर्योगी हलीसकः ।
गन्धसारः स्थिरसारः, स्थिरको ध्रुवसाधनः ॥ १९९३
अभ्रंलिहो महापत्रो, बलसारो बलप्रभः ।
धर्मणे तु धनुर्वृक्षो, गोत्रवृक्षो रुजासहः ॥ १९९४
महाबलो महावृक्षो, राजाह्वो धन्वनः फलम् ।
स्वादुफलो मृत्युफलः, सारवृक्षः सुतेजनः ॥ १९९५
सिल्लके तु सिद्धवृक्षः, कोलिपत्रे तु जोरणः ।
महापत्रे त्वगदी स्याद्विषशङ्कुः पलाशकः ॥ १९९६
पारिभद्रे द्रुकिलिमं, किलिमं देववल्लभः ।
दारुकं स्नेहविद्धं च, देवद्रुः स्वर्गतो द्रुमः ॥ १९९७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पीतपूतिमहादेवभद्रेन्द्रा काष्ठदारुणी ।
मधूके मधुशाकः स्यान्माधवो मधुको मधुः ॥ १९९८
मधुष्ठीलो मधुष्ठालो, मधुकाष्ठो मधुस्रवः ।
रोध्रः कोषमधुर्गुडपुष्पो गोलफलोऽपि च ॥ १९९९
जलजेऽस्मिन्मधूलः स्याद्विरिजो दीर्घपत्रकः ।
तीरवृक्षो गौरशाको, ह्रस्वपुष्पफलोऽपि च ॥ २०००
तिन्दुके स्फूर्जनस्तुष्टः, कालस्कन्धो विरूपकः ।
निःस्यन्दनः कालशाको, द्रावणो नीलसारकः ॥ २००१
द्वितीयतिन्दुके कालस्तिन्दुर्मर्कटतिन्दुकः ।
काकेन्दुकः काकपीलुः, कुपालुकुलकावपि ॥ २००२
रोध्रे लोध्रः सिते तत्र, शाबरस्तनुवल्कलः ।
उत्सादनो महारोध्रोऽनम्भः शंबरपादपः ॥ २००३
रक्ते तु पट्टिका तिल्वः, पट्टी लाक्षा प्रसादनः ।
तिरीटो मार्जनश्चिल्ली, कानीनः क्रमुकः शिशुः ॥ २००४
स्थूलवल्को बृहत्पत्रः, कृष्णरोध्रे तु गालवः ।
भूर्जे भुजो बहुपटो, मृदुवल्को मृदुच्छदः ॥ २००५
रेखापत्रश्छत्रपत्रो, बहुत्वक्चर्मिणावपि ।
श्लेष्मान्तके भूतवृक्षः, पिच्छिलो द्विजकुत्सितः ॥ २००६
वसन्तकुसुमः शेलुः, कफेलुर्लेखशाटकः ।
विषघाती बहुवारः, शीत उद्दालकः शलुः ॥ २००७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लकुचे लकुटो ग्रन्थिफलाम्बुपनसा मधुः ।
लघुत्वक् क्षुद्रपनसस्तनु स्यात्कुब्जकं फलम् ॥ २००८
आम्रे रसालो माकन्दः, कामाङ्गः पिकबान्धवः ।
वनपुष्पोऽशवश्चूतः, परपुष्टो मदोद्भवः ॥ २००९
मधुदूतो मधुफलः, सुफलो मदिरासखः ।
वसन्तपादपोऽसौ तु, सहकारोऽतिसौरभः ॥ २०१०
क्षुद्राम्रे स्यात्कृमितरुर्लक्षावृक्षो जतुद्रुमः ।
सुकोशको घनस्कन्धः, केशाम्बुश्च सुरक्तसः ॥ २०११
टङ्को नीलकपित्थोऽन्यो, राजपुत्रो नृपात्मजः ।
जम्ब्वां महाफला राजजम्बूर्नीलाम्बुजच्छदा ॥ २०१२
सुगन्धिपत्रा साऽन्या तु, काकजम्बूः कुजम्बुका ।
उशीरपत्रा नादेयी, वैदेशी काकवल्लभा ॥ २०१३
मदने ध्वसनो राठः, शल्यको विषनाशकः ।
करहाटो मरुबकः, पिण्डी पिण्डीतकः फलः ॥ २०१४
सूर्यपुत्रकर्कटकौ, विषगन्धो विषोदरः ।
मत्स्यान्तकफलो राजपुत्रकः कफवर्धनः ॥ २०१५
कुब्जके कामुकं श्यामसारः फुल्लो मिसिद्रुमः ।
निचुले तु नदीकान्तोऽम्बुजो हिज्जुल इज्जलः ॥ २०१६
गन्धपुष्पो गुच्छफलोऽनुवाकः कच्छकोऽप्यपि ।
वेतसे विदुलः शीतो, नदीकूलप्रियो रथः ॥ २०१७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम्रपुष्पः पत्रमाली, वाणीरो वञ्जुलोऽपि च ।
स्यादम्बुवेतसे भीरुर्नादेयी बालभीरुकः ॥ २०१८
विदुलो मञ्जरीनम्रः, परिव्याधो निकुञ्जकः ।
वरुणे गन्धवृक्षः स्यात्तिक्तशाकः कुमारकः ॥ २०१९
श्वेतपुष्पः श्वेतफलस्तमालो मारुतापहः ।
साधुवृक्षः श्वेतवृक्षः, सेतुरश्मरिकारिपुः ॥ २०२०
अङ्कोटे स्यात्पीतसारो, दीर्घकीलो निकोचकः ।
अङ्कोलकस्ताम्रफलो, रेचको गन्धपुष्पकः ॥ २०२१
भिलातके वीरतरुररुष्कोऽरुष्करो व्रणः ।
भौतिको भूतनुद्भूरिरेहः शोफकरो धनुः ॥ २०२२
अग्निमुखी बहुपत्रो, भल्ली सूर्याग्निसंज्ञकः ।
अरिष्टे स्यात्कृष्णवर्णो, रक्तबीजोऽर्थसाधनः ॥ २०२३
शुभनामा शीतफेनः, फेनिलो गर्भपातनः ।
निम्बे तु सर्वतोभद्रः, पारिभद्रः सुतिक्तकः ॥ २०२४
पिचुमन्दो यवनेष्टः, शुकेष्टः शुकमालकः ।
अरिष्टो हिङ्गुनिर्यासो, वेता नियमनोऽपि च ॥ २०२५
महानिम्बे निम्बकरः, कार्मुको विषमुष्टिकः ।
रम्यकः क्षीवको वृक्षोऽक्षिपीलुः केशमुष्टिकः ॥ २०२६
पीलौ स्रंसी सहस्राङ्गः, शीतः करभवल्लभः ।
गुल्मारिर्गुडफलश्चाथासिस्तु गिरिसंभवे ॥ २०२७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षोटः कर्परालश्च, फलस्नेहो गुहाशयः ।
पारावते तु सारास्नो, रक्तमालः परावतः ॥ २०२८
आरेवतः सारफलो, महापारावतो महान् ।
कपोताण्डतुल्यफलो, रुद्राक्षे तु महामुनिः ॥ २०२९
स तु चतुर्मुखो ब्रह्मा, द्विमुखस्तु वरार्गलः ।
षण्मुखस्तु कार्तिकेयः, पञ्चमुखस्तु शंकरः ॥ २०३०
माधवस्त्वेकवदनो, विजयाशस्त्रधारणः ।
पुत्रंजीवे त्वक्षफलः, कुमारजीवनामकः ॥ २०३१
करञ्जे स्यान्नक्तमालः, पूतीकश्चिरबिल्वकः ।
करजः श्लीपदारिश्च, प्रकीर्णः कलिनाशनः ॥ २०३२
भेदास्त्वस्य त्रयस्तत्र, षड्ग्रन्था हस्तिवारुणी ।
कर्मद्यां तु कृतमाल, उदकार्यः प्रकार्यकः ॥ २०३३
अङ्गारवल्यां शार्ङ्गस्था, कासघ्नी करतालिका ।
रोहीतके रोहितको, रोही दाडिमपुष्पकः ॥ २०३४
रोहेडकः सदापुष्पो, रोचना श्लीहरक्तहा ।
कट्फले तु सोमवल्कः, कैडर्यो गोपभद्रिका ॥ २०३५
कुम्भी कुमुदिका भद्रा, श्रीपर्णी भद्रवत्यपि ।
दाडिमे कुट्टिमः कीरवल्लभः फलपाण्डवः ॥ २०३६
हरको दन्तबीजश्चाघोडपुष्पे जपा जवा ।
मातक्यां तु धातुपुष्पा, बर्हिपुष्प्यग्निपुष्पिका ॥ २०३७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताम्रपर्णी सुभिक्षा च, कुञ्जरा मधपावनी ।
सल्लक्यां वल्लकी ह्रादा, सुवहा सुस्रवा रसा ॥ २०३८
अश्वमूर्तिः कुन्दरुकी, गजभक्ष्या महेरणा ।
गन्धवीरा गन्धकारी, सुरभिर्वनकर्णिका ॥ २०३९
एरण्डे तरुणश्चित्रो, दीर्घदण्डो व्यडम्बकः ।
पञ्चाङ्गुलो वर्द्धमान, आमण्डो रुवको रुवूः ॥ २०४०
व्याघ्रपुच्छो व्याघ्रतरुश्चक्षुरुत्तानपत्रकः ।
गन्धर्वहस्तकश्चक्षुरादण्डो हस्तिपर्णकः ॥ २०४१
उरुवूको हस्तिकर्णः, शुक्लो रक्तश्च स द्विधा ।
किम्पाके तु महाकालः, काकर्दः काकमर्दकः ॥ २०४२
कम्पिल्लके तु काम्पिल्लो, रक्ताङ्गो रक्तचूर्णकः ।
चन्द्राह्वयो रेचनकः, कर्कशाङ्गः पटोदयः ॥ २०४३
केतकच्छदनीयोऽम्बुप्रसादनफलः कृतः ।
कार्पास्यां तु समुद्रान्ता, बदरा तुण्डिकेर्यपि ॥ २०४४
सा तु वन्या भरद्वाजी, भद्रा चन्दनबीजिका ।
वन्दायां स्यात्तटरुहो, शौक्लर्यपदरोहिणी ॥ २०४५
वृक्षादनी वृक्षरुजो, जयन्ती कामपादपः ।
स तु क्षीरवृक्षभवो, नन्दीवृक्षो जयद्रुमः ॥ २०४६
आटरूषे वृषो वासा, वाशिका वाजिदन्तकः ।
भिषङ्माता सिंहमुखः, सिंहांका सिंहपर्णिका ॥ २०४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुम्बरौ सानुजः सौरः, सौरलो(सो) वनजोदकः ।
तीक्ष्णवल्कस्तीक्ष्णफलस्तीक्ष्णपत्रो महामुनिः ॥ २०४८
कदल्यां तु हस्तिविषा, रम्भा मोचाऽंशुमत्फला ।
काष्ठीला वारणवुशा, स्यात्कालीरस इत्यपि ॥ २०४९
तगरे कालानुसार्यं, चक्राख्यो मधुको नृपः ।
तूले तूदं ब्रह्मदारु, ब्रह्मण्यं ब्रह्मकाष्ठकम् ॥ २०५०
ब्रह्मनिष्ठं च दार्पं च, क्रमुकं ब्रह्मचारि च ।
मुष्ककं मूर्खको घण्टा, क्रन्दालो मोक्षमुंचकौ ॥ २०५१
पाटलिर्गोलिहः क्षारश्रेष्ठः कृष्णः सितश्च सः ।
वंशो यवफलो वेणुः, शतपर्वा तृणध्वजः ॥ २०५२
मस्करस्त्वचिसारस्त्वक्सारकर्मारतेजनाः ।
ग्राम्येरुच्यां विश्वदेवदेवा ह्रस्वा गवेधुका ॥ २०५३
खण्डारिष्टा नागबला, स्वरबन्धनिकेत्यपि ।
दार्वी दारुहरिद्रायां, पीता कण्टकसेरुका ॥ २०५४
पीतद्रुमः पीतदारु, पीतनं पीतचन्दनम् ।
मार्जनी कर्कटकिनी, कालेयकः पचम्पचा ॥ २०५५
ग्रन्थिपर्णे श्लिष्टपर्णं, विकीर्णं शीर्णरोमकम् ।
हरितं कुकुरं पुष्पं, शुकगच्छं शुकच्छदम् ॥ २०५६
स्थौणेयकं वह्निचूडा, सुगन्धग्रन्थिकावपि ।
स्पृक्कायां ब्राह्मणी पङ्कमुष्टिकापि शुनावधूः ॥ २०५७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुद्रान्ता मरुन्माला, निर्माल्या देवपुत्रिका ।
लक्ष्मातिका कोटिवर्षा, देवी पङ्कजमुष्टिका ॥ २०५८
गोमी स्वर्णलतेन्द्राणी, मरुन्माला तला लघुः ।
विडङ्गे केरला मोघा, तन्दुलः कृष्णतन्दुलः ॥ २०५९
वेलकः (भसकः) कृमिहा जन्तुघातको मृगगामिनी ।
इन्द्राक्षे ऋषभो वीरः, श्रीमान्वृषभनामकः ॥ २०६०
धूर्धुरो गोपतिः शृङ्गी, बन्धुरः पृथिवीपतिः ।
ऋद्धौ सिद्धिर्युगं योग्यं, रथाङ्गं मङ्गलं वसु ॥ २०६१
ऋषिसृष्टसुखं लक्ष्मीर्वृद्धेरप्याह्वया अमी ।
पद्मके मालकः पीतो, रक्तश्च रुसरुदयवः ॥ २०६२
सुशुभः शीतवीर्यश्च, पाटलः पीतवर्णकः ।
कङ्कुष्टे स्यात्काककुष्टः, पुलकः काकपालकः ॥ २०६३
रेचनः शोधनो ह्रासो, विडङ्गो रङ्गदायकः ।
परूषके स्यादल्पास्थिः, परुषो नीलपर्णकः ॥ २०६४
परोऽपरः परश्चैष, परिमण्डल इत्यपि ।
खर्जूरे त्वभ्रुजः पिण्डी, निःश्रेणिः स्वादुमस्तकः ॥ २०६५
खर्जूरिकायां स्याद्भूमिखर्जूरी काककर्कटी ।
ताले तलो लेख्यपत्रस्तृणराजो ध्वजद्रुमः ॥ २०६६
नालिकेरे रसफलो, लाङ्गली कूर्चकेसरः ।
दाक्षिणात्यो प्रौढफलो, नारिकेरो लतातरुः ॥ २०६७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूगे गुवाकः क्रमुकः, पूगी च (खपुरा) नीलवल्कलः ।
घण्टाऽस्य फलमुद्वेगं, चिक्के तु तत्र चिक्कणम् ॥ २०६८
विन्ताके तु रजःपुष्पो, जम्बूलः क्रमुकच्छदः ।
हिन्ताले तु तृणराजो, राजवृक्षो लताङ्कुरः ॥ २०६९
ताल्यां तु मृत्युपुष्पा स्यादेकपत्रफलापि च ।
खर्जूरतालखर्जूरीतालीहिन्तालकेतकाः ॥ २०७०
क्रमुको नालिकेरश्च, स्युरेते तृणपादपाः ॥ २०७१

इत्याचार्यश्रीहेमचन्द्रविरचिते निघण्टुशेषे प्रथमो वृक्षकाण्डः ।

सिन्दुवारे तु निर्गुण्डी, सीन्दुको नीलसन्धिकः ।
शीतसहा च सुरसा, चेन्द्राणी सिन्दुवारकः ॥ २०७२
सा नीला वनशेफाली, सुपुष्पा नीलमञ्जरी ।
श्वेता तु श्वेतसुरसा, गोलोमा भूतकेश्यपि ॥ २०७३
शेफालिकायां सुवहा, निर्गुण्डी नीलिकासुता ।
सुरसा रक्तवृन्ता च, श्वित्रघ्नी पुष्पवर्षिणी ॥ २०७४
सा तु शुक्ला भूतकेशी, सत्यनाम्नी बहुक्षमा ।
प्रियङ्गौ प्रियकः कङ्गुः, प्रियवल्ली प्रियालता ॥ २०७५
विष्वक्सेना गन्धफली, कारम्भा फलिनी फली ।
गुन्द्रा गोवन्द्रनी श्यामा, योषाह्वा पर्णभेदिनी ॥ २०७६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मधुरायां यष्टीमधुस्तल्लक्षणा मधुस्रवा ।
क्लीतकं च जलजासौ, मधुपर्णी मधूलिका ॥ २०७७
अश्वगन्धायां तुरगी, कम्बुकाश्वावरोहकः ।
अश्वकन्दो बहुगन्धा, पुत्रदा कोलकर्ण्यपि ॥ २०७८
मेषशृङ्ग्यामजशृङ्गी, वर्तिका सर्पदंष्ट्रिका ।
सैव स्याद्दक्षिणावर्ता, वृश्चिकाला विषाणिका ॥ २०७९
उष्ट्रधूमकपुच्छा च, काली च विषघातिनी ।
शृङ्गी तु कर्कटशृङ्ग्यां, नताङ्गी शिशिरेफला ॥ २०८०
कर्कटाह्वा महाघोषा, वक्रा मञ्जरिशिम्बिका ।
निदिग्धिकायां कण्टाली, दुःस्पर्शा कण्टकारिका ॥ २०८१
व्याघ्री क्षुद्रा दुष्प्रधर्षा, धावनी हेमपुष्पिका ।
बृहत्यां क्षुद्रभण्टाकी, वार्ताकी राष्ट्रिका कुली ॥ २०८२
विशदः सिंह्यनाक्रान्ता, महोटिका महत्यपि ।
विदार्यां तु स्वादुकन्दा, पुष्पकन्दा मृगालिका ॥ २०८३
वृक्षादनी चर्मकषा, भूकुष्माण्ड्यश्ववल्लभा ।
बिडालिका वृक्षपर्णी, महाश्वेता परा तु सा ॥ २०८४
क्षीरशुक्ला क्षीरकन्दा, क्षीरवल्ली पयस्विनी ।
ऋष्यगन्धेक्षुगन्धेक्षुवल्ली क्षीरविदारिका ॥ २०८५
पृश्निपर्ण्यां पृथक्पर्णी, लाङ्गली क्रोष्टुपुच्छिका ।
शृगालवर्णा कलशी, घृतिका धावनी गुहा ॥ २०८६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहपुच्छी चित्रपर्ण्यद्विपर्णी तिलपर्ण्यपि ।
गोक्षुरे स्थलशृङ्गालवनशृङ्गाटगोक्षुराः ॥ २०८७
कण्टी षडङ्गी गोकण्टस्त्रिकण्टस्तु त्रिकस्त्रिकः ।
इक्षुगन्धा व्यालदंष्ट्रः, श्वदंष्ट्रः स्वादुकण्टकः ॥ २०८८
परङ्गषा कण्टफलः, षडङ्गस्तुक्षुरः क्षुरः ।
दन्त्यां शीघ्रोपशल्या च, चित्रोदुम्बरपर्णिका ॥ २०८९
मकूलको रामदूती, निकुम्भो घुणवल्लभा ।
नागदन्त्यां हस्तिदन्ती, वारुणी चापि चिर्भिटी ॥ २०९०
मृगादनी मृगैर्वारुर्मृगाक्षी भुजगस्फटा ।
श्वेतपुष्पा मधुपुष्पा पर्वपुष्पा, विषौषधिः ॥ २०९१
अपामार्गे त्वधःशल्या, किणिही खरमञ्जरी ।
धामार्गवः शौखरिको, वशिरः कपिपिष्पली ॥ २०९२
कपिवल्ली मर्कटिका, शिखर्याघाटदुर्ग्रहौ ।
प्रत्यक्पुष्पी पत्रपुष्पी, केशवल्ली मयूरकः ॥ २०९३
पुनर्नवायां वृश्चीरो, दीर्घपत्रा शिलाटिका ।
विशाखः क्षुद्रवर्षाभूः, कटिलः प्रावृषायणी ॥ २०९४
शोफघ्नी चापरा त्वेषा, कूरमण्डलपत्रकः ।
श्वेतमूला महावर्षा, भूवर्षकेतुरित्यपि ॥ २०९५
ज्योतिष्मत्यां स्वर्णलता, दुर्मना लवणाम्लिका ।
पारावतपदी पण्या, ज्योतिष्का कटभीत्यपि ॥ २०९६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माषपर्ण्यौ(मार्द्रमाषा मांसमासा)सूर्यपर्णी, पाण्डुश्चापि महा-
सहा ।
अश्वपुच्छा सिंहवृन्ता, कम्बोजी कृष्णवृन्तिका ॥ २०९७
मुद्गपर्ण्यौ काकमुद्गा, वन्या मार्जारगन्धिका ।
शिवा क्षुद्रसहा ह्रासी, रङ्गणी सूर्यपर्णिका ॥ २०९८
भूम्यामलक्याममला, बहुपुत्रा वितुन्नकः ।
तामलक्युज्झटा ज्ञायतालिका नुन्नमालिनी ॥ २०९९
हरिद्रायां वर्णवती, काञ्चनी वरवर्णिनी ।
निशाख्या रञ्जनी गौरी, पीतिका मेहघातिनी ॥ २१००
वेश्या विटप्रिया पिंडा, हरिता च तरङ्गिणी ।
प्रपुन्नाटे तु दद्रुघ्नश्चक्राकश्चक्रमर्दकः ॥ २१०१
मेषाक्षो मेषकुसुमः, पद्माटैडगजावपि ।
मुण्ड्यां मुण्डतिका भिक्षुः, श्रावणी जीवबोधिनी ॥ २१०२
श्रवणा श्रवणशीर्षा, प्रव्रजिता तपस्विनी ।
महाश्रावणिकायां तु, व्यथा कदम्बपुष्पिका ॥ २१०३
ग्रन्थिका लोभनीया च, च्छिन्नग्रन्थनिकापि च ।
वाकुच्यां स्यात्कालमेषी, दुर्गन्धा कुष्ठनाशिनी ॥ २१०४
पूतिपर्णी सोमराजी, सुवल्ली सोमवल्लिका ।
अवल्गुजः कृष्णफला, दुर्लेखा पूतिफल्यपि ॥ २१०५
रास्नायां श्रेयसी रस्या, रसन्यतिरसा रसा ।
एलापर्णी गन्धमूला, सुवहा मारुतापहा ॥ २१०६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाकुल्यां सर्पगन्धा तु, सुगन्धा वारिपत्रका ।
गन्धनाकुलिकायां तु, सर्पाक्षी विषमर्दिनी ॥ २१०७
महासुगन्धा सुवहा, छत्राकी नकुलप्रिया ।
कुठेरके त्वर्जकः स्याक्षुद्रपत्रः कुठिञ्जरः ॥ २१०८
वैकुण्ठस्तीक्ष्णगन्धश्च, द्वितीयो वटपत्रकः ।
पर्णासो बिल्वगन्धश्च, स तु कृष्णः सरालकः ॥ २१०९
कालतालः कृष्णमल्ली, मालुकः कृष्णमालुकः ।
तुलस्यां सुरसा प्रेतराक्षसी बहुमञ्जरी ॥ २११०
यस्या गौरी शक्रपत्नी, भूतघ्नी देवदुन्दुभिः ।
फणिञ्जके मरिचकः, खरपत्रोऽत्रपत्रकः ॥ २१११
मरूपको मरुबको, जर्म्मीरो मारुतः फणी ।
त्रायन्ती त्रायमाणायां, कृतत्राणाद्विसानुजा ॥ २११२
वार्षिकं बदरा घृष्टिर्वाराही बलभद्रिका ।
बलदेवा सुदुत्राणा, विष्वक्सेनप्रियापि च ॥ २११३
यवासके धन्वयासो, यासो धन्वयवासकः ।
दूरमूलो दीर्घमूलो, बालपत्रो मरूद्भवः ॥ २११४
कुनाशकोऽधिष्टकण्टस्ताम्रमूली प्रचोदनः ।
दुस्पर्शः कच्छुरानन्ता, समुद्रान्ता दुरालभा ॥ २११५
किराततिक्ते कैरातो, रामसेनः किरातकः ।
अनार्यतिक्तको हैमो, भूनिम्बः काण्डतिक्तकः ॥ २११६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुष्ठे तु पाकलं रामं, वानीरं वाप्यमुत्पलम् ।
वानीरजं वापिभाव्यं, कौरवं व्याधिनामकम् ॥ २११७
वालके जलकेशाख्यं, बर्हिष्टं दीर्घरोमकम् ।
हीवेरो दिव्यवज्राणि, पिङ्गमाचमनं रुचम् ॥ २११८
शंख्यां पलाशः षड्ग्रन्था, गन्धोली हिमजा वधूः ।
कर्बुरः सुव्रता ग्रन्थमूली पृथुफलाशिका ॥ २११९
एलावालुका त्वैलेयं, वालुकं हरिवालुकम् ।
सुगन्ध्यालुकमेलवालु, दुर्वर्णं प्रसरं दृढम् ॥ २१२०
कुङ्कुमे रक्तपर्यायं, संकोचपिशुनं शुकम् ।
हीरं कुसुम्भं घुसृणं, पीतं वाल्हीकपीतने ॥ २१२१
काश्मीरजं वह्निशिखं, वरं लोहितचन्दनम् ।
जात्यां तु रजनीपुष्पा, मालती तैलभाविनी ॥ २१२२
प्रियंवदा हृद्यगन्धा, मनोज्ञा सुमनोलता ।
तस्यास्तु कलिकायां स्यात्पत्री सौमनसायिनी ॥ २१२३
जातीफले जातिकोशं, शालूकं मालतीफलम् ।
मज्जसारं जात्यमृतं, शौण्डं सौमनसं पुटम् ॥ २१२४
यूथिकायां बालपुष्पा, मागधी शङ्खयूथिका ।
गुणोज्ज्वला पुण्यगन्धा, चारुमोटा शिखण्डिनी ॥ २१२५
अम्बष्ठा गणिका सा तु, पीता स्याद्धेमपुष्पिका ।
कुन्दे माध्यः सदापुष्पो, मकरन्दो मनोहरः ॥ २१२६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अट्टहासो भृङ्गमित्रं, शाल्योदनो यमश्वसः ।
स्यान्नवमालिकायां तु, मोमाली नवमालिनी ॥ २१२७
सत्सला मुकुरारातिः, सुरभिः शिशुगन्धिका ।
कान्ता विभावरी ग्रीष्मा, ग्रैष्मिका शिखरिण्यपि ॥ २१२८
मल्लिकायां शीतभीरुर्मदयन्ती प्रमोदनी ।
अष्टापदी तृणशूल्यं, गवाक्षा भूपदीत्यपि ॥ २१२९
वार्षिक्यां षट्पदानन्दी, श्रीमती सुभगा प्रिया ।
सुवर्षा त्रिपुटा व्यस्तसुरूपा मुक्तबन्धनात् ॥ २१३०
कुमार्यां तु वर्णिचारुकेसरा भृङ्गसंमता ।
तरणी रामतरणिर्गन्धाढ्या कन्यका सहा ॥ २१३१
अमिलाने स्यादम्लानौ·····महासहा ।
रक्तपुष्पः कुरुबकः, पीतपुष्पः कुरण्टकः ॥ २१३२
सैरेयके सहचरो, झिण्टी महाबरश्च सः ।
स तु रक्तः कुरवकः, स्यात्पीतस्तु कुरण्टकः ॥ २१३३
नील आर्तगलो दिसी, बाण ओदनपाक्यपि ।
किंकिराते किंकिराटः, पीतभद्रः प्रलोभ्यपि ॥ २१३४
चित्रके वल्लरीव्यालः, पाठीनो दारुणः कुटः ।
ज्योतिष्को जरणोऽभ्याख्यो, बलिनद्धिपिपाठिनः ॥२१३५
वासन्त्यां स्यात्प्रहसन्ती, सुवसन्ता वसन्तजा ।
सेव्यालिबान्धवा शीतसंवासा सीतला वसा ॥ २१३६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नील्यां श्रीफलिका काला, दोला मेला विशोधनी ।
सूणी तुच्छा भारवाही, रज्जनी मधुपर्णिका ॥ २१३७
द्रोणी क्षीतकिका ग्राम्या, नीलकेशी महारसा ।
दमने स्याद्ब्रह्मजटा, मुनिर्दानार्षिपुत्रकौ ॥ २१३८
गन्धोत्कटः पुण्डरीकः, पाण्डुरागस्तपस्व्यपि ।
धत्तूरे धूर्तधत्तूरौ, कितवो देवता शठः ॥ २१३९
घण्टापुष्पस्तलफलो, मातुलः कनकाह्वयः ।
उन्मत्तो मदनश्चास्य, फलं मातुलपत्रकम् ॥ २१४०
शङ्खपुष्प्यां क्षीरपुष्पी, शिवब्रह्मकिरीटिनी ।
मधुपुष्पी मधुगन्धा, शङ्खाह्वा शङ्खमालिनी ॥ २१४१
धूसरच्छदना श्वेतपुष्पी वनविलासिनी ।
कर्चूरे द्रविडः काल्यो, वेधान्यो गन्धमूलकः ॥ २१४२
मोचामस्त्वजमोदायां, मयूरो लोचमस्तकः ।
खराश्वा कारवी वस्तगन्धा हस्तिमयूरकः ॥ २१४३
दीप्यो वल्ली ब्रह्मदर्भा, लोचमर्कट इत्यपि ।
यवान्यां स्यादुग्रगन्धा, यमनी यवसाह्वयः । २१४४
सहदेव्यां तथा दण्डोत्पला गोचन्दना वसा ।
गन्धवर्णा सितैः पुष्पैर्विश्वदेवा तु सारुणैः ॥ २१४५
पर्पटके वरतिक्तो, रजः कवचनामकः ।
गोजिह्वायां शृङ्गवेरी, दार्विका भूमिकालिका ॥ २१४६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बलायां शीतपाकी स्याद्भवोदन्योदनाह्वया ।
वाट्यालकस्तथा वाट्यपुष्पिका पीतपुष्पिका ॥ २१४७
देवसहा सहदेवाऽतिबला बाह्यपुष्पिका ।
ऋष्या प्रोक्ता ऋष्यगन्धा, कङ्कता वर्षपुष्पिका ॥ २१४८
वाट्यायिनी भूरिबला, तिष्या वीर्या बृहद्बला ।
महागन्धा गन्धबली, मङ्गल्याऽर्थप्रसाधनी ॥ २१४९
मुसल्यां तु तालमूली, दुर्नामारिर्मे(श?)त्विषा ।
वृष्यकन्दा तालपर्णी, सुमूला बलदा शिवा ॥ २१५०
हिङ्गौ जतुकवाल्हीकगूढगन्धानि रामठम् ।
सहस्रवेधि भूतघ्नं, जरणं सूपधूपनम् ॥ २१५१
हिङ्गुपत्र्यां पृथुः पृथ्वी, दीर्घिका चारिपत्रिका ।
जातूका रामठी वंशपत्रा पिण्डा शिवाटिका ॥ २१५२
कारवी करवी तन्वी, वाप्पिका बिल्वकेत्यपि ।
काकजङ्घायां तु दासी, लोमहीना प्रभाबलः ॥ २१५३
नदीकान्तो नद्यास्या च, पारावतपदीत्यपि ।
काकनासायां सुरङ्गा, वायसी वायसाङ्गिका ॥ २१५४
वारुणी तस्करस्नायुः, काकतुण्डफला च सा ।
पाषाणभेदे नगभिच्छिलाभिच्चित्रपर्णकः ॥ २१५५
हमुषायां विस्रगन्धा, वपुषा मत्स्यगन्धिनी ।
साऽन्याऽश्वत्थफला ध्वाङ्क्षनामिका कच्छुनाशिनी ॥२१५६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घण्टारवायां स्यान्मल्यपुष्पिका श(र)घण्टिका ।
अल्पघण्टा बृहत्पुष्पी, शणपुष्पी महाशणः ॥ २१५७
शणे तु किंकिणी जाली, जन्तुनन्तुर्महाशणः ।
शीघ्रप्ररोही बलवान् सुपुष्पः क्षेत्रमण्डनः ॥ २१५८
कुसुम्भेऽग्निशिखं महारञ्जनं कमलोत्तरम् ।
शालपर्ण्यां दीर्घमूला, त्रिपर्णी पीतिनी ध्रुवा ॥ २१५९
विदारि गन्धातिगुहा, स्थिरा भौमांशुमत्यपि ।
भार्ग्यां वर्वरकः पद्मा, वन्दकोऽङ्गारवल्लिका ॥ २१६०
गर्दभशाकब्राह्मण्यौ, हङ्गी ब्राह्मणयष्टिका ।
आवर्तक्यां चर्मरङ्गा, विभाण्डी पिच्छिका लता ॥ २१६१
रक्तपुष्पा बिंदुकिनी, स्यान्महाजालिनी च सा ।
विस्रगन्धा.	२१५६	वृकोत्तशा.	२२०५
विहीरा.	१९८३	वृत्ता.	२१७०
वीर.	२०६०	वृद्धकर्णिका.	२१७९
वीरण.	२२६९	वृद्धपादा.	२१६३
वीरतर.	२२६९	वृन्त.	१९७४
वीरतरु.	२०२२	वृन्तिका.	१९८२
वीरपुष्कर.	२२५१	वृश्चिकाला.	२०७९
वीरभद्र.	२२६९	वृश्चीर.	२०९४
वीरशाक.	२२३३	वृष.	२०४७
वीर्या.	२१४९	वृषभनामक.	२०६०
वुक.	२१७४	वृषा.	२२११
वुस्तिका.	२२४२	वृषायणी.	२२३९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृष्यकन्दा. २१५०
वेण्या. २२०५
वेत. २०२५
वेतस. १९४८, २०१७
वेत्रमूला. २१६२
वेधान्य. २१४२
वेल्लक. २१६०
वेल्लज. २१८८
वेश्या. २१०१
वैकुण्ठ. २१०९
वैजयन्तिका. १९७३
वैदेशी. २०१३
वैदेही. २१८९
वैश्रवणावास. १९३०
व्यडम्बक. २०४०
व्यडिपत्रिका. २२४८
व्यण्डा. २१८५
व्याघ्रतल. २०४१
व्याघ्रनखी. १९६०
व्याघ्रपाद. १९६७
व्याघ्रपुच्छ. २०४१
व्याघ्री. २०८२
व्याधिनामक. २११७
व्याधिहन्. १९८७
व्यालदंष्ट्र. २०८८
व्रण. २०२२
व्रीहि. २२७१

श

शकम्भरा. २२५२
शकलि. २२५४
शकुन्ती. १९०८
शकुलाक्षक. २२६५
शकुलादनी. २१७३, २१८४
शक्रतरु. १९९२
शक्रपली. २१११
शक्रपुष्पिका. २२०२
शङ्कर. १९६१, २०३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शङ्खघण्टिका. २१५७
शङ्खद्रावक. १९४८
शङ्खधरा. २२४३
शङ्खनी. २१६३
शङ्खपुष्पी. २१४१
शङ्खमालिनी. २१४१
शङ्खयूथिका. २१२५
शङ्खाह्वा. २१४१
शङ्खिनी. २२१०
शठ. २१३९
शठी. २११९
शण. २१५८, २२०२
शणिपुष्पी. २१५७
शण्डेरिन्. १९३९
शतपत्र. २२१३
शतपदी. २१८१
शतपर्वन्. २०५२
शतपर्वा. २२४४, २२६३
शतपर्विका. २१९६
शतपाकिन्. २१७८
शतपुष्प. २२६८
शतपुष्पा. २२२१
शतप्राश. १९१८
शतमूला. २१८१
शतवीर्य. २१८१
शतवीर्या. २२६५
शतवेधि. १९४९
शता. २२६५
शतावरी. २१८०
शताह्वा. २२२१
शबरपादप. २००३
शमीधान्य. २२८४
शमीपत्रा. २१७१
शम्पाक. १९८७
शम्बरी. २२११
शर. २२६१
शरश. २१९८
शलाटु. १९६८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शल्यक. २०१४
शल्यपर्णी. २१७६
शव. २००९
शष्प. २२६२
शाक. १९९३
शाकपुष्प. १९६६
शाकवीर. २२३३
शाकश्रेष्ठ. २२३३
शाकश्रेष्ठा. २२३५
शाकाम्ल. १९४६
शाखाम्ल. १९४८
शाण्डिल्य. १९६८
शाबर. २००३
शारद. १९८५
शारदा. २२७५
शारदी. २१७३
शारिवा. २१९८
शार्ङ्गस्था. २०३४
शालपर्णी. २१५९
शालमर्कट. २२४२
शालि. २२७२
शालिक. २२६२
शालूक. २१२४, २२१९
शाल्मलि. १९५६
शाल्मलिदल. १९८५
शाल्योदन. २१२७
शिंशिपा. १९५८
शिखण्डिनी. २१२५, २१७८
शिखरिणी. २१२८
शिखरी. २०९३
शिखीग्रीव. १९९०
शिग्रु. १९७६
शिति. २२४१
शितिशिम्बिक. २२७७
शितिवर. २२४१
शिफा. २२१९
शिम्बिका. २२७६
शिरिवारक. २२४०
शिरोरु. १९८६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिरोवृन्त. २१८९
शिलाटिका. २०९४
शिलाभित्. २१५५
शिव. १९६५
शिवकिरीटिनी. २१४१
शिवकीलिका. १९६१
शिवधूप. १९६५
शिवमल्ली. २१७४
शिवलोमा. १९६२
शिवा. १९६१, १९७०, २०९८, २१५०
शिवाटिका. २१५२
शिवाधात्री. १९७२
शिशिरेफला. २०८०
शिशु. २००४
शिशुगन्धिका. २१२८
शिषर. १९२४
शीघ्र. २०८९, २२७०
शीघ्रपरोहिन्. २१५८
शीत. २००७, २०२७, २०१७
शीतपाकी. २१४७
शीतभीरु. २१२९
शीतलरजः. १९२३
शीतला. १९०९
शीतवीर्य. २०६३
शीतसंवासा. २१३६
शीतसहा. २०७२
शीर्णरोमक. २०५६
शुक. २१२१, २२६२
शुकच्छद. २०५६
शुकनास. १९१७, १९७५
शुकपुष्प. १९०७, २०५६
शुकप्रिय. १९०७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुकमालक.	२०२५	शखरिक.	२०९२
शुकवृक्ष.	१९०७	शैलूष.	१९६८
शुकशिम्बी.	२०२५	शैवला.	२२२०
शुक्तिकाम्ली.	१९४५	शैवाल.	२२२०
शुक्तिपर्णी.	१९८४	शैवालदलसम्भव.	२२६८
शुङ्गिन्.	१९२९, १९३१	शोधन.	२०६४
		शोधिता.	२२८०
शुचिपत्रा.	१९६२	शोफूकर.	२०२२
शुभनामन्.	२०२४	शोकघ्नी.	२०९५
शुषिरा.	१९२५	शोभाञ्जन.	१९७६
शूकधान्य.	२२८४	शोषण.	१९७५
शूकशिम्बी.	२१८६	शोषहरी.	२२३८
शून्यमध्य.	२२५९	शौण्ड.	२१२४
शून्या.	१९२६	शौण्डर्य.	२१६८
शृङ्गक.	२२४९	शौण्डी.	२१९०
शृङ्गवेर.	२१४६	शौखरी.	२०४५
शृङ्गिन्.	२०६१	शौरि.	१९८८
शृङ्गी.	२१७५	श्मशानकन्द.	२२२४
शोफालिका.	२०७४	श्यव.	२०६२
शेलु.	२००७	श्यामक.	२२७९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्यामकन्दा. २१७५
श्यामल. १९२८
श्यामवल्कल. १९०७
श्यामसार. २०१६
श्यामा. २०७६, २१९०
श्यामाक. २२७९
श्यामाङ्गी. २२६४
श्योनाक. १९७५
श्रवणशीर्षा. २१०३
श्रवणा. २१०३
श्रवणी. २१०२
श्रीखण्ड. १९११
श्रीपर्णी. १९७३, १९८२, २०३६
श्रीपुष्प. १९२५
श्रीफल. १९६९
श्रीफला. १९७२
श्रीफलिका. २१३७
श्रीमती. २१३०
श्रीमान्. २०६०
श्रीवारक. २२४१
श्रीवास. १९६९
श्रीवृक्ष. १९२७
श्रीहस्तिनी. २२४०
श्रेयसी. १९७०, २१०६, २१७९, २१९२
श्याह्व. १९६८
श्याह्वय. १९२५
श्लक्ष्णपत्र. १९५१
श्लिष्टपर्णी. २०५६
श्लीपदारि. २०३२
श्लेष्मान्तक. २००६
श्वखुर. २१९४
श्वनावधू. २०५७
श्वेत. १९१३
श्वेतकन्दिका. २१७५
श्वेतकुम्भीका. १९०९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वेतचन्दन. १९११
श्वेतदूर्वा. २२६५
श्वेतपुष्प. १९१८, २०२०
श्वेतपुष्पा. २०९१
श्वेतपुष्पिका. २१९४
श्वेतपुष्पी. २१४२
श्वेतफल. २०२०
श्वेतबुध्ना. २२१०
श्वेतमरिच. १९७८
श्वेतमूला. २०९५
श्वेतवचा. २१९७
श्वेतवल्क. १९३२
श्वेतवृक्ष. २०२०
श्वेतसर्षप. २२८३
श्वेतसार. १९५४
श्वेतसुरसा. २०७३
श्वेतस्यन्दा. २१९४

ष

षट्पदानन्दी. २१३०
षट्रसा. १९७२
षडङ्गी. २०८८
षडूग्रन्था. २०३३, २१९७, २११९
षण्ढतिल. २२८३
षष्टिक. २२७१

स

संवर्त्तक. १९७१
संवर्त्तिका. २२१८
सकटाक्ष. १९८१
सक्तुफला. १९६१
सङ्कोच. २१२१
सतीद. १९३०
सतीनक. २२७३
सत्पुष्प. २१६९
सत्यनाम्नी. २०७५
सत्यवती. २२२८
सत्सला. २१२८
सदापुष्प. १९३८, २०३५, २१२६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सदाफल.	१९३२	सर्ज.	२२४९
सनकद्रु.	१९३५	सर्जकस्.	१९९१
सप्तच्छद.	१९८४	सर्पगन्धा.	२१०७
सप्तला.	२२२५	सर्पदंष्ट्रिका.	२०७९
समगन्धि.	२२६९	सर्पाक्षी.	२१०७
समङ्गा.	२१७१, २१८७	सर्वतोभद्र.	२०२४
समण्ठ.	२२३८	सर्वतोभद्रा.	१९८३
समन्तदुग्धन्.	१९३९	सर्वसार.	१९७९
समष्ठीला.	२२३८	सर्षप.	२२८३
समुद्रान्ता.	२०४४, २०५८, २११५	सल्लक.	१९७५
समूलक.	२१९१	सल्लकी.	२०३८
समूला.	२१५०	सवरणी.	२१८२
सरस्वती.	२२२८	सस्य.	२२७१
सरालक.	२१०९	सस्यशीर्षक.	२२८४
सरी.	२२७४	सस्यशूक.	२२८४
सरु.	२०६२	सस्यसंवर.	१९९१
सरोज.	२२१४	सहकार.	२०१०
सरोजन्मन्.	२२१४	सहचर.	२१३३
		सहदेवा.	२१४८
		सहदेवी.	२१४५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहर्षा. २१७०
सहस्रपत्र. २२१३
सहस्रवीर्या. २१८२, २२६४
सहस्रवेधि. २१५१
सहस्रवेधिन्. १९४९
सहस्राङ्क. २०२७
सहा. २१३१, २२२१
साङ्कर. १९६२
सातला. २२२५
साधुपादप. १९४३
साधुवृक्ष. २०२०
सानुज. २०४८, २१६८
सानुमानक. २१६९
सारणी. २२२७
सारफल. २०२९
सारवृक्ष. १९९५
साराम्ल. २०२८
सारीबानी. २२५६
सिंहपर्णिका. २०४७
सिंहपुच्छी. २०८७
सिंहमुख. २०४७
सिंहवृन्ता. २०९७
सिंहि. २०८३
सिंहिका. २०४७
सित. १९५४
सिताम्भोज. २२१५
सिद्धवृक्ष. १९९६
सिद्धार्थ.. २२८३
सिद्धि. २०६१
सिन्दुक. २०७२
सिन्दुवार. २०७२
सिन्दुवारक. २०७२
सिलक. १९९६
सीतप्लावसा. २१३६
सीत्य. २२७१
सुकन्द. २२२४
सुकुराराति. २१२८
सुकोशक. २०११
सुखदा. २२२८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखोद्भिदा.	२२३१	सुप्रसारा.	२२२७
सुगन्धक.	१९१५	सुफल.	२०१०
	२२४६	सुभगा.	२१३०
	२२५५	सुमञ्जन.	१९७७
सुगन्धा.	२१०७	सुभिक्षा.	२०३८
	२२२२	सुमन.	२२७७
सुगन्धि.	१९९०	सुमनस्.	१९८६
	२१२०	सुमनालता.	२१२३
सुगन्धिक.	२२७२	सुमूलक.	२२६९
सुगन्धिपत्रा.	२०१३	सुरक्तस.	२०११
सुचिपत्र.	२२४०	सुरङ्गक.	१९१५
सुतिक्तक.	२०२४	सुरङ्गा.	२१५४
सुतिक्तता.	२२०६	सुरङ्गिन्.	१९७७
सुत्तेजन.	१९९५	सुरति.	२१२८
सुधा.	१९३८	सुरभि.	१९१२
सुनिषण्ण.	२२४०		२०३९
सुन्यभीरु.	२१८२		२१६७
सुपादी.	२१७२	सुरसा.	२०७२
सुपार्श्व.	१९२९		२११०
सुपुष्प.	२१५८	सुरा.	२१६७
सुपूरक.	१९४२	सुलोमशा.	२१६७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुवर्चला. २२३०
सुवर्ण. १९९२
सुवर्णक. १९८४, १९८६
सुवर्षा. २१३०
सुवल्ली. २१०५
सुवसन्ता. २१३६
सुवाहा. २०३८, २०७४, २१०६, २१०८
सुवासन्ती. १९२७
सुविषघातिनी. २२०५
सुव्रत. २१७४
सुव्रता. २११९
सुषवी. २२४४
सुषेणक. १९३९
सुसभ. २०६३
सुस्थलगण्डीर. २२३९
सुस्वरा. २०६८
सूक्ष्मैला. १९२०
सुतघ्न. २१५१
सूतनाशिनी. २१९७
सूपधूपन. २१५१
सूरण. २२२९
सूर्यपर्णिका. २०९८
सूर्यपर्णी. २०९७
सूर्यपत्र. २०१५
सूर्यांग्निसन्निभक. २०२३
सेकिम. २२४२
सेतु. २०२०
सेव्य. १९९२
सेव्यालिबान्धवा. २१३६
सेहुण्ड. १९३९
सैरेयक. २१३३
सोमराजी. २१०५
सोमवल्क. १९५४, २०३५
सोमवल्लरी. २२२८
सोमवल्लिका. २१०५
सोमवल्ली. २२०३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौगन्धिक.	२२१७	स्थूलदर्भ.	२२६१
सौमनसम्पुट.	२१२४	स्थूलपर्ण.	१९८५
सौमनसायिनी.	२१२३	स्थूलवल्क.	२००५
सौर.	२०४८	स्थूलैला.	१९२१
सौरभ.	२०४८	स्थौणेयक.	२०५७
सौवीरी.	१९६०	स्निग्धपर्णी.	२२०१
स्कन्धजन्मन्.	१९३१	स्पृक्का.	२०५७
स्तम्ब.	२२८५	स्फटिक.	१९२३
स्तम्बकरि.	२२७१	स्फूर्जक.	२००१
स्तोगन्धिक.	२२५४	स्फोता.	२१८९
स्त्रिपत्रक.	१९८०	सारक्षीपीडा.	२१६२
स्थलपर्कट.	१९४०	संसिन्.	२०२७
स्थलशृङ्गाल.	२०८७	सवा.	२२००
स्थायिनी.	२१७९	सुच्.	१९३८
स्थालय.	२२४३	सुवावृक्ष.	१९३७
स्थाली.	१९०८	स्वदंष्ट्र.	२०८८
स्थिरक.	१९९३	स्वरबन्धनिका.	२०५४
स्थिरसार.	१९९३	स्वर्गज.	१९९७
स्थिरा.	२१६०	स्वर्णलता.	२०५९, २०९६
स्थूल.	१९८७		

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वर्णशेफालिक. १९८८
स्वस्तिक. २२४०
स्वादुकण्टक. १९६७, २०८८
स्वादुकन्दा. २०८३
स्वादुफल. १९९५
स्वादुमस्तक. २०६५

ह

हंसपदी. २१७२
हंसपादिका. २१७२
हञ्जी. २१६१
हट. २२२०
हट्टविलासिनी. २१०१
हपुषा. २१५६
हयप्रिय. २२७३
हरि. २२७५
हरिचन्दन. १९९४
हरित. २२२५, २२७५
हरिता. २२६४
हरिताली. २२६४
हरित्. २२७३
हरिद्रा. २१००
हरिपर्णक. २२४२
हरिमन्थ. २२७६
हरिमन्थक. २२७४
हरिवालुक. २१२०
हरीतकी. १९६२
हरेणु. २२७४
हलिनी. २२०३
हलीमक. १९९९
हल्लक. २२१७
हविर्मन्थ. १९७४
हस्तविषा. २०४९
हस्तिकर्ण. २०४२
हस्तिकोशातकी. २२०८
हस्तिदन्तक. २२४१
हस्तिदन्ती. २०९०
हस्तिपर्णक. २०४१
हस्तिपिप्पली. २१९३
हस्तिमयूरक. २१४३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्तिवारुणी.	२०३६	हृद्यगन्ध.	१९६९
हिंस्रा.	२१६५	हृद्यगन्धा.	२१२३
हिङ्गु.	२१५२	हेमक्षीरा.	२२०९
हिङ्गुनिर्यास	२०२१	हेमदुग्धक.	१९३१
हिङ्गुपत्री.	२१५२	हेमपुष्पिका.	२१२६, २०८२
हिज्जल.	२०१६	हेमवती.	२२०९
हिन्ताल.	२०६९, २०७०	हेमशिखी.	,,
हिमजा.	२११९	हेमाह्वया	,,
हिमवालुक.	१९२२	हैम.	२११६
हिमाह्व.	१९२२	हैमवती.	१९६९, २१९७
हिलमोची.	२२४३	हीवेर.	२११८

इति श्रेष्ठि देवचंद लालभाई जैनपुस्तकोद्धारे-ग्रन्थाङ्कः ९२



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीजैनआनंदपुस्तकालये लभ्यग्रन्थाः—

१	अहिंसाष्टकं, सर्वज्ञसिद्धिः ऐन्द्रस्तुतिश्च	०—८—०
२	अनुयोगद्वार—चूर्णिहरिभद्रीयवृत्तिश्च	१-१२-०
३	उत्तराध्ययन—चूर्णिः	३—८—०
४	ऋषिभाषितानि	०—२—०
५	ज्योतिष्करंडकप्रकीर्णकम् (सटीकम्)	३—०—०
६	जिनस्तुति-देशना (हिन्दी)	०—६—०
७	तत्त्वतरंगिणी	०—८—०
८	त्रिषष्टीयदेशनासंग्रहः	०—८—०
९	दशवैकालिक—चूर्णिः	४—०—०
१०	प्रकीर्णकदशकम्(संस्कृतच्छायान्वितम्)	१—८—०
११	द्रव्यलोकप्रकाशः	१—०—०
१२	नंदीआदिअकारादिक्रमो विषयक्रमश्च	१—८—०
१३	नंदीचूर्णिहरिभद्रीयवृत्तिश्च	१—४—०
१४	नवपद-प्रकरण-बृहद्वृत्तिः	३—०—०
१५	परिणाममाला (लेजर पेपर)	०-१२-०
	,, ,, (क्रोहंग पेपर)	०-१०-०
१६	प्रवचन-सारोद्धारः (पूर्वार्द्धः)	३—०—०
१७	,, ,, (उत्तरार्द्धः)	३—०—०
१८	पंचाशकादिशास्त्राष्टकम् मूलमात्रम्	३—०—०
१९	पंचाशकादिशास्त्रदशकस्याकाराद्यनुक्रमः	३—०—०
२०	पंचवस्तुकग्रन्थः (सटीकः)	२—४—०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२१ पयरणसंदोहो	०-१२-०
२२ प्रव्रज्या-विधान-कुलकादि	०-३-०
२३ प्रत्याख्यानादि-विशेषणवती-वीशवीशी	१-४-०
२४ बारसासूत्रं (सचित्रं)	१२-०-०
२५ मध्यमसिद्धप्रभा व्याकरणम्	०-८-०
२६ यशोविजयजीकृत १२५, १५०,३५०, गाथायाः स्तवनानि(साक्षिपाठसहितानि)	०-८-०
२७ युक्ति-प्रबोधः	१-८-०
२८ ललितविस्तरा (सटीप्पना)	०-१०-०
२९ वस्त्रवर्णसिद्धिः	०-४-०
३० विचार-रत्नाकरः	२-४-०
३१ विशेषावश्यक-विषयानुक्रमः अकारादिक्रमः	०-३-०
३२ वंदारुवृत्तिः	१-४-०
३३ श्राद्धविधिः (हिन्दी)	१-८-०
३४ क्षेत्रलोक-प्रकाशः	२-०-०
बृहत्सिद्धप्रभाव्याकरणम्	
आचारांगसूत्रवृत्तिः	
भगवतीसूत्रं दानशेखरसूरिकृतवृत्तिसहितम्	
पुष्पमाला अपरनाम उपदेशमालाप्रकरणवृत्तिः	
तत्त्वार्थसूत्रम् (हारिभद्रीयटीकासहितम्)	

श्री-जैन-आनंद-पुस्तकालय,
ओशवाल महोल्ला, गोपीपुरा, सुरत.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीहेमचन्द्राचार्यविरचितं

लिङ्गानुशासनम् ।



पुंलिङ्गं कटणथपभमयरषसस्त्वन्तमिमनलौ किञ्चित् ।
ननौ घघञौ दः किर्भावे खोऽकर्तरि च कः स्यात् ॥ १

हस्तस्तनौष्ठनखदन्तकपोलगुल्फ-
केशाध्वगुच्छदिनसर्तुपतद्ग्रहाणाम् ।
निर्यासनाकरसकण्ठकुठारकोष्ठ-
हैमारिवर्षविषबोलरथाशनीनाम् ॥ २

श्वेतप्लवात्ममुरजासिकफाभ्रपङ्क-
मन्थत्विषां जलधिशेवधिदेहभाजाम् ।
मानद्रुमाद्रिविषयाशुगशोणभास-
धान्याध्वराग्निमरुतां सभिदां तु नाम ॥ ३

बर्होऽच्छदेऽहिर्वप्रे त्रीह्यग्न्योर्हायनबर्हिषौ ।
मस्तुः सक्तौ स्फटिकेऽच्छो, नीलमित्रौ मणीनयोः ॥ ४

कोणेऽस्त्रश्वषके कोशस्तलस्तालचषेटयोः ।
अनातोद्ये घनो भूम्नि, दारप्राणासुवस्त्वजाः ॥ ५

कान्तश्चन्द्रार्कनामायःपरो यानार्थतो युगः ।
यश्च स्यादसमाहारे, द्वन्द्वोऽध्वबडवाविति ॥ ६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाकोत्तरा नक्तकरलकाङ्का, न्युङ्कोत्तरा सङ्कतरङ्गरङ्गाः ।
परागपूगौ सृगमस्तुलुङ्गकुडङ्गकालिङ्गतमङ्गमङ्गाः ॥ ७
वेगसमुद्गावपाङ्गवर्गौ घार्घा मञ्चसपुच्छपिच्छगच्छाः ।
वाजौजकिलिञ्जपुञ्जमुञ्जा अवटपट्टहठप्रकोष्ठकोष्ठाः ॥ ८
अङ्गुष्ठगण्डौ लगुडप्रगण्डकरण्डकूष्माण्डगुडाः शिखण्डः ।
वरण्डरुण्डौ च पिचण्डनाडीव्रणौ गुणभ्रूणमलक्तकुन्तौ ॥ ९
पोतः पिष्टातः पूषतश्चोत्पातवातावर्थकपर्दौ ।
बुद्बुदगदमगदो मकरन्दो, जनपदगन्धस्कन्धमगाधः ॥ १०
अर्धसुदर्शनदेवनमह्राभिजनजनाः परिधानतर्फौ ।
पूपापूपौ सूपकलापौ रेफः शोफः स्तम्बनितम्बौ ॥ ११
शम्बाम्बौ पाञ्चजन्यतिष्यौ पुष्यः सिचयनिकाय्यरात्रवृत्राः ।
मञ्जामित्रौ कटप्रपुण्ड्राऽऽराः कल्लोलोल्लौ च सल्लतल्लौ ॥ १२

कण्डोलपोटगलपुद्गलकालवाला-
वेला गलो जगलहिङ्गुलगोलफालाः ।
स्याद्देवलो वहुलतण्डुलपत्रपाल-
वातूलतालजडुला भृमलो निचोलः ॥ १३

कामलकुद्दालावयवस्वाः, स्वरौरवयावाः शिवदावौ ।
माधवपणवादीनवहावध्रुवकोटीशांशाः स्पशवंशौ ॥ १४
कुशोङ्कीशपुरोडाशवृषकुल्मासनिष्कुहाः ।
अहर्निर्यूहकलहाः, पक्षराशिवराश्यृषिः ॥ १५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुंदुभिर्वेमतिर्वृष्णिपाप्यविज्ञातिरालिकलयोऽञ्जलिर्घृणिः ।
अग्निवह्निक्रमयोऽहिदीदिविग्रन्थिकुक्षिदृतयोऽर्दनिर्ध्वनिः ॥
गिरिशिश्रुजायुकर्प्पो हाहाहूहूश्च नम्रहूर्गर्मुत् ।
पादश्मानावात्मा पाप्मस्वेमोष्मयक्ष्माणः ॥ १७

इति पुंल्लिङ्गाधिकारः ।

स्त्रीलिङ्गं योनिमद्भ्रीसेनावल्लितडित्रिशाम् ।
वीचितन्द्रावदुम्रीवाजिह्वाशस्त्रीदयादिशाम् ॥ १८
शिंशपाद्या नदीवीणाज्योत्स्नाचीरीतिधीधियाम् ।
अङ्गुलीकलशीकङ्कुहिङ्कुपर्त्रीसुरानसाम् ॥ १९
रास्नाशिलावचालालाशिम्बाकृष्णोष्णिकाश्रियाम् ।
सूक्ष्मपण्याऽतसीधाय्यासरघारोचनाभुवाम् ॥ २०
हरिद्रामांसिदूर्वाऽऽलूखलाकाकृष्णलागिराम् ।
इत्तु प्राण्यङ्गवाचि स्यादीदूदेकस्वरं कृतः ॥ २१
पात्रादिवर्जितादन्तोत्तरपदः समाहारे ।
द्विगुरत्राबन्तान्तो वाऽन्यस्तु सर्वो नपुंसकः ॥ २२
लिन्मिन्यनिण्यणिस्युक्ताः, क्वचित्तिगल्पहस्वकप् ।
विंशत्याद्याशताद्वन्द्वे, सा चैक्ये द्वन्द्वमेययोः ॥ २३
सुग्गीतिलताभिदि धुवा, विडनरि वारि घटीभबन्धग्रोः ।
शल्यध्वनिवाद्यभित्सु तु, क्ष्वेडा दुन्दुभिरक्षविन्दुषु ॥ २४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृह्या शाखापुरेऽश्मन्तेऽन्तिका कीला रताहतौ ।
रज्जौ रश्मिर्यवादिर्दोषादौ गङ्गा सुरागृहे ॥ २५
अहंपूर्विकादिर्वर्षा, मघा अप्कृत्तिका बहौ ।
वा तु जलौकोऽप्सरसः, सिकतासुमनःसमाः ॥ २६
गायत्र्यादय इष्टका बृहतिका संवर्तिका सज्जिका-
दूषीके अपि पादुका झिरुकया पर्यस्तिका मानिका ।
नीका कञ्चुलिकाऽलुका कलिकया राका पताकाऽन्धिका,
शूका पूपलिका त्रिका चविकयोल्का पञ्जिका पिण्डिका २७
ध्रुवका क्षिपका कनीनिका, शम्बूका शिबिका गवेधुका ।
कणिका केका विपादिका, मिहिका यूका मक्षिकाऽष्टका २८
कूर्चिका कूचिका टीका, कोशिका केणिकोर्मिका ।
जलौका प्राविका धूका, कालिका दीर्घिकोष्ट्रिका ॥ २९
शलाका वालुकेषीका, विहङ्गिकेषिके उखा ।
परिखा विशिखा शाखा, शिखा भङ्गा सुरङ्गया ॥ ३०
जङ्घा चङ्घा कच्छा पिच्छा, पिङ्गा गुङ्गा खजा प्रजा ।
झञ्झा घंटा जटा घोण्टा, पोटा भिस्सटया छटा ॥ ३१
विष्ठा मञ्जिष्ठया काष्ठा, पाठा शुण्डा गुडा जडा ।
बेडा वितण्डया दाढा, राढा रीढाऽवलीढया ॥ ३२
घृणोर्णा चर्वणा स्थूणा, दक्षिणा लिखिता लता ।
तृणता त्रिवृता त्रेता, गीता सीता सिता चिता ॥ ३३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्ता वार्ता लूताऽनन्ता, प्रसूता मार्जिताऽमृता ।
कन्था मर्यादा गदेक्षुगन्धा गोधा स्वधा सुधा ॥ ३४
साक्षा सूना धाना पम्पा, झम्पा रम्पा प्रपा शिफा ।
कम्बा भम्भा सभा हम्भा, सीमा पामारुमे उमा ॥ ३५
चित्या पद्या पर्या योग्या, छाया माया पेया कक्ष्या ।
दूष्या नस्या शय्या संध्या, रथ्या कुल्या ज्या मङ्गल्या ॥ ३६
उपकार्या जलार्द्रेरा, प्रतिसीरा परम्परा ।
कण्डरा सृग्धरा होरा, वागुरा शर्करा सिरा ॥ ३७
गुन्द्रा मुद्रा क्षुद्रा भद्रा, भस्त्रा छत्त्रा यात्रा मात्रा ।
दंष्ट्रा फेला वेला मेला, गोला दोला शाला माला ॥ ३८
मेखला सिध्मला लीला, रसाला सर्वला बला ।
कुहाला शङ्कुला हेला, शिला सुवर्चला कला ॥ ३९
उपला शारिवा मूर्वा, लट्वा खट्वा शिवा दशा ।
कशा कुशेशा मञ्जूषा, शेषा मूषेषया स्रसा ॥ ४०
वस्रसा विस्रसा भिस्सा, नासा वाहा गुहा स्वाहा ।
कक्षाऽऽमिक्षा रिक्षा राक्षा, भङ्ग्यावल्यायतिस्रोटिः ॥ ४१

येशिर्वासिर्वसतिविपणी नाभिनाल्यालि पालि-
र्भल्लिः पल्लिर्भ्रुकुटिशकटी चर्चरिः शाटिभाटी ।
खाटिर्वर्तिर्व्रततिवमिशुण्ठीतिरीतिर्वितर्दि-
र्दर्विर्नीविच्छविलिबिशठिश्रेढिजात्याजिराजि ॥ ४२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुचिः सूचिसाची खनिः खानिखारी,
खलिः कीलितूली क्लमिर्वापिधूली ।
कृषिः स्थालिहिण्डी त्रुटिर्वेदिनान्दी,
किकिः कुक्कुटिः काकलिः शुक्तिपङ्क्ती ॥ ४३
किखिस्ताडिकर्म्मी द्युतिः शारिराति-
स्तटिः कोटिविष्टी वटिर्गृष्टिवीथी ।
दरिर्वल्लरिर्मञ्जरिः पुञ्जिभेरी,
शरारिस्तुरिः पिण्डिमाढी मुषण्डिः ॥ ४४
राटिराटिरटविः परिपाटिः,
फालिगालिजनिकाकिनि कानिः ।
चारिहानिवलभि प्रधिकम्पी,
चुल्लिचुण्डितरयोऽहतिशाणी ॥ ४५
सनिः सानिमेनी मरिर्मारिरश्यो-
षधी विद्रधिर्झल्लरिः पारिरभ्रिः ।
शिरोधिः कविः कीर्तिगान्त्रीकवर्यः,
कुमार्याढकी स्वेदनी ह्रादिनीली ॥ ४६
हरिण्यश्मरी कर्तनीस्थम्यपथ्यः,
करीर्येकपद्यक्षवत्यः प्रतोली ।
कृपाणीकदल्यौ पलालीहसन्यौ
वृसी गृध्रसी घर्घरी कर्परी च ॥ ४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काण्डी खल्ली मही धटी, गोणी खण्डाल्येषणी द्वयोः ।
तिलपर्णी केवली स्यटी, नद्धीरवसत्यौ च पातली ॥ ४८

वाली गन्धोली काकली गोष्ठ्यजाजी-
न्द्राणी मत्स्यण्डी दामनी शिञ्जिनी च ।
भृङ्गी कस्तूरी देहली मौर्व्यतिभ्या-
सन्दी क्षेरेय्यः दर्द्रुपर्शूशष्कुली॥ ४९

कर्णान्दुकच्छू तनुरज्जुचञ्चु-
स्नायुर्जुहूः सीमधुरौ स्फिगर्वाक् ।
द्वार्वोदिवौ सुक्त्वगृचः शरद्वा-
श्छर्दिर्हरत्पामदृषद्दृशौ नौः ॥ ५०

इति स्त्रीलिङ्गाधिकारः ।

नलस्तुतत्तसंयुक्तरुयान्तं नपुंसकम् ।
वेधआदीन् विना सन्तं, द्विस्वरं मन्नकर्तरि ॥ ५१

धनरत्ननभोऽभ्रहरीकतमोघृसृणाङ्गणशुल्कशुभाम्बुरुहाम् ।
अघगूथजलांशुकदारुमनोविलपिच्छधनुर्दलतालुहृदाम् ५२

हलदुःखसुखागुरुहिङ्गुरुचत्वचभेषजतुत्थकुसुम्भदृशाम् ।
मरिचास्थिशिलाभवसूक्ष्मयकृन्नलदान्तिकवल्कलसिध्मयुधाम्
सौवीरस्थानकद्वारक्षोमधौतेयकासृजाम् ।
लवणव्यञ्जनफलप्रसूनद्रवतां सभिद् ॥ ५४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरं सद्माङ्गयोश्छत्रशीर्षयोः पुण्डरीकके ।
मधु द्रवे ध्रुवं शश्वत्तर्कयोः खपुरं घटे ॥ ५५
अयूपे दैवेऽकार्यादौ, युगं दिष्टं तथा कटु ।
असे द्वन्द्वस्थले धन्वारिष्टमद्रुमपक्षिणोः ॥ ५६
धर्मं दानादिके तुल्यभागेऽर्धं ब्राह्मणं श्रुतौ ।
न्याय्ये सारं पद्ममिभबिन्दौ काममनुमतौ ॥ ५७
खलं भुवि तथा लक्षं, वेध्येऽहः सुदिनैकतः ।
भूमोऽसंख्यात एकार्थे, पथः संख्याव्ययोत्तरः ५८
द्वन्द्वैकत्वाव्ययीभावौ, क्रियाऽव्ययविशेषणे ।
कृत्याः क्तानाः खलर्थिद्भावे, आ त्वात्त्वादिः समूहजः ५९
गायत्र्याद्यण्स्वार्थेऽव्यक्तमथानञ्कर्मधारयः ।
तत्पुरुषो बहूनां चेच्छाया शालां विना सभा ६०
राजवर्जितराजार्थराक्षसादेः परापि च ।
आदावुपक्रमोपज्ञे, कन्थोशीनरनामनि ॥ ६१
सेनाशालासुराच्छायानिशा वोर्णा शशात्परा ।
ब्राह्मणो गृहतः स्थूणा, संख्याऽदन्ता शतादिका ॥ ६२

मौक्तिकं माक्षिकं सौत्रिकं क्रीतकं,
नाणकं नाटकं खेटकं तोटकम् ।
आह्निकं रूपकं जापकं जालकं,
वैणुकं गैरिकं कारकं वासुकम् ॥ ६३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुचकं धान्याकनिःशलाकाली-
कालिकशल्कोपसूर्यकाल्कम् ।
कवककिवुकतोकतिन्तिडीके-
ङ्कं छत्राकत्रिकोल्मुकानि ॥ ६४

मार्द्वीककदम्बके बुकचिबुककुतुकमनूकचित्रके ।
कुहुजकं मधुपर्कशीर्षके, शालूकं कुलकं प्रकीर्णकम् ॥ ६५
हलीसकपुष्पके खलिङ्गं, स्फिगमङ्गं प्रगचोचबीजपिञ्जम् ।
रिष्टं फाण्टं ललाटमिष्टव्युष्टकरोटकूपीटचीनपिष्टम् ॥ ६६

शृङ्गाटमोरटपिटान्यथ पृष्ठगोष्ठे,
भाण्डाण्डतुण्डशरणग्रहणेरिणानि ।
पिङ्गाणतीक्ष्णलवणद्रविणं पुराणं,
त्राणं शणं हिरणकारणकार्मणानि ॥ ६७

पर्याणर्णघ्राणपारायणानि,
श्रीपर्णोष्णे धोरणक्षूणभूतम् ।
प्रादेशान्ताश्मन्तशीतं निशान्तं
वृत्तं तूस्तं वार्तवाहित्थमुक्थम् ॥ ६८

अच्छोदगोदकुसिदानि कुसीदतुन्द-
वृन्दास्पदं दपदनिम्न सशिल्पतल्पम् ।
कूर्पत्रिविष्टपपरीपवदन्तरीप-
रूपं च पुष्पनिकुरम्बकुटुम्बशुल्बम् ॥ ६९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसभतलभशुष्माध्यात्मधामेर्मसूक्ष्मं,
किलिमतलिमतोक्मं युग्मतिग्मं त्रिसंध्यम् ।
किसलयशयनीये सायखेयेन्द्रियाणि,
द्रुवयभयकलत्रद्वापरक्षेत्रसत्रम् ॥ ७०

शृङ्गवेरमजिराभ्रपुष्करं, तीरमुत्तरमगारनागरे ।
स्फारमक्षरकुकुन्दरोदरप्रान्तराणि शिविरं कलेवरम् ॥ ७१

सिन्दूरमण्डूरकुटीरचामर-
क्रूराणि दूरारवैरचत्वरम् ।
औशीरपातालमुशल्लालतैवे,
सत्त्वं च सान्त्वं दिवकिण्वयौतवम् ॥ ७२

विश्वं वृशं पलिशमर्पिशकिल्विषानु-
तर्षार्पिषं मिषमृचीषमृजीषशीर्षे ।
पीयूषसाध्वसमहानससाहसानि
कासीसमत्सतरसं यवसं बिसं च ॥ ७३

मन्दाक्षवीक्षमथ सक्थि शयातु यातु,
स्वाद्वाशु तुम्बरु कशेरु शलालु चालु ।
संयत्ककुन्महदहानि पृषत्पुरीतत्,
पर्वाणि रोम च भसच्च जगल्ललाम ॥ ७४

इति नपुंसकलिङ्गाधिकारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुंस्त्रीलिङ्गश्चतुर्दशेऽङ्के शङ्कुर्निरये च दुर्गतिः ।
दोर्मूले कक्ष आकरे गल्लो भूरुहि बाणपिप्पलौ ॥ ७५
नाभिः प्राण्यङ्गके प्रधिर्नेमौ क्वचन बलिर्गृहे कुटः ।
ओष्यौषध्योः कटो भ्रमो मोहे पिण्डो वृन्दगोलयोः ॥ ७६
भकनीनिकयोस्तारो, मेऽश्लेषहस्तश्रवणाः ।
कणः स्फुलिङ्गे लेशे च, वराटो रज्जुशस्त्रयोः ॥ ७७
कुम्भः कलशे तरणिः, समुद्रार्काशुयष्टिषु ।
भागधेयो राजदेये, मेरुजम्ब्वां सुदर्शनः ॥ ७८
करेणुर्गजहस्तिन्योरल्याख्यापत्यतद्धितः ।
लाजवस्त्रदशौ भूम्नीहाद्याः प्रत्ययभेदतः ॥ ७९
शुण्डिकचर्मप्रसेवकौ सल्लकमल्लकवृश्चिका अपि ।
शल्यकघुटिकौ पिपीलिकश्चुलुकहुड्डुकतुरुष्कतिन्दुकाः ८०
शुङ्गोऽथ लञ्चभुजशाटसटाः सृपाटः,
कीटः किटस्फटघटा वरटः किलाटः ।
चोटश्चपेटफटशुण्डगुडाः सशाणाः,
स्युर्वारिपर्णफणगर्तरथाजमोदाः ॥ ८१
विधकूपकलम्बजित्यवर्द्राः, सहचरमुद्गरनालिकेरहाराः ।
बहुकरकूसरौ कुठारशारौ, वल्लरशफरमसूरकीलरालाः ८२
पटोलः कम्बलो भल्लो, दंशो गण्डूषवेतसौ ।
लालसो रभसो वर्तिर्वितस्तितुट्यस्तृटिः ॥ ८३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्मिशस्यौ रत्नयत्नौ अवीचि-
र्लव्यप्याणिश्रेणयः श्रोण्यरण्यौ ।
पार्ष्णीशल्यौ शाल्मलिर्यष्टिमुष्टी,
योनीमुन्यौ स्रातिगव्यूतिवस्त्यः ॥ ८४

मेथिर्मेधिमशी मषीषुधी ऋष्टिः पाटलिजाटली अहिः ।
पृश्निस्तिथ्यशनी मणिः सृणिर्मौलिः केलिहलीमरीचयः ८५
हन्वास्थूः कर्कन्धुः सिन्धुर्भृत्युमन्वाट्टेर्वारुः ।
उरुः कन्दुः काकुः किष्कुर्बाहुगवेधू रा गौर्भाः ॥ ८६

इति पुंस्त्रीलिङ्गाः ।

पुंनपुंसकलिङ्गोऽब्जः, शङ्खे पद्मोऽब्जसंख्ययोः ।
कंसः पुंसि कुशो बर्हिर्बालो हीवेरकेशयोः ॥ ८७
द्वापरः संशये छेदे, पिप्पलो विष्टरोऽतरौ ।
अब्दो वर्षे दरस्रासे, कुकूलस्तुषपावके ॥ ८८
परीवादपर्यङ्कयोर्जन्यतल्पौ,
तपोघर्मवत्सानि माघोष्णहृत्सु ।
वटस्तुल्यतागोलभक्ष्येषु वर्णः,
सितादिस्वराद्यो रणे संपरायः ॥ ८९
सैन्धवो लवणे भूतः, प्रेते तमो विधुंतुदे ।
स्रदायौ कस्रे कृच्छ्रं, व्रते शुक्रोऽग्निमासयोः ॥ ९०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्पूरस्वर्णयोश्चन्द्र, उडावृक्षं छदे दलः ।
धर्मः स्वभावे रुचको, भूषाभिन्मातुलुङ्गयोः ॥ ९१
पाताले वाडवो वर्द्रः, सीसे आमलकः फले ।
पिटजङ्गलसत्त्वानि, पिटकामांसजन्तुषु ॥ ९२
मधुपिण्डौ सुरातन्वोर्नाम शेवालमध्ययोः ।
एकाह्नात्रः समाहारे, तथा सूतककूलकौ ॥ ९३
वैनीतकभ्रमरकौ मरको वलीक-
वल्मीकवल्कपुलकाः फरकव्यलीकौ ।
किंजल्ककल्कमणिकस्तबका वितङ्क-
वर्चस्कचूचुकतडाकतटाकतङ्काः ॥ ९४
बालकः फलकमालकालका,
मूलकस्तिलकपङ्कपातकाः ।
कोरकः करककन्दुकान्दुका-
ऽनीकनिष्कचषका विशेषकः ॥ ९५
शाटककण्टकटङ्कविटङ्का, मञ्चकमेचकनाकपिनाकाः ।
पुस्तकमस्तकमुस्तकशाका, वर्णकमोदकमूषिकमुष्काः ॥ ९६
चण्डातकश्चरकरोचककञ्चुकानि,
मस्तिष्कयावककरण्डकतण्डकानि ।
आतङ्कशुकसरकाः कटकः सशुल्कः,
पिण्याकझर्झरकहंसकशङ्खपुङ्खाः ॥ ९७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नखमुखमधिकाङ्गः संयुगः पद्मरागो,
भगयुगमथ टङ्कोद्योगशृङ्गा निदाघः ।
ककचकवचकूर्चार्धर्चपुच्छोञ्छकच्छाः,
व्रजमुटजनिकुञ्जौ कुञ्जभूर्जाम्बुजाश्च ॥ ९८

ध्वजमलयजकूटाः कालकूटारकूटौ,
कवटकपटखेटाः कर्पटः पिष्टलोष्टौ ।
नटनिकटकिरीटाः कर्वटः कुक्कुटाट्टौ,
कुटयकुटविटानि व्यङ्गटः कोट्टकुष्ठाः ॥ ९९

कमठो वारुण्डखण्डषण्डा,
निगडाक्रीडनडप्रकाण्डकाण्डाः ।
कोदण्डतरण्डमण्डमुण्डा,
दण्डाण्डौ दृढवारबाणबाणाः ॥ १००

कार्षापणश्रवणपक्कणकंकणानि,
द्रोणापराह्णचरणानि तृणं सुवर्णम् ।
स्वर्णव्रणौ वृषणभूषणदूषणानि,
भाणस्तथा किणरणप्रवणानि चूर्णः ॥ १०१

तोरणपूर्तनिकेतनिवाताः, पारतमन्तयुतप्रयुतानि ।
श्वेडितमक्षतदैवतवृत्तैरावतलोहितहस्तशतानि ॥ १०२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्रतोपवीतौ पलितो वसन्तध्वान्तायुतद्यूतघृतानि पुंस्तः ।
शुद्धान्तवुस्तौ रजतो मुहूर्तद्वियूथयूथानि वरूथगूथौ १०३
प्रस्थं तीर्थं प्रोथमलिन्दः, ककुदः कुकुदाष्टापदकुन्दाः ।
गुददोहदकुमुदच्छदकन्दार्बुदसौधमथोत्सेधकबन्धौ १०४

श्राद्धायुधान्धौषधगन्धमादन-
प्रस्फोटना लग्नपिधानचन्दनाः ।
वितानराजादनशिश्नयौवना-
र्थानोदपानासनकेतनाशनाः ॥ १०५

नलिनपुलिनमौना वर्धमानः समानौ-
दनदिनशतमाना ह्यायनस्थानमानाः ।
धननिधनविमानास्ताडनस्तेनवस्त्रा,
भवनभुवनयानोद्यानवातायनानि ॥ १०६

अभिधानद्वीपिनौ निपानः,
शयनं लशुनरसोनगृञ्जनानि ।
खलिनखलीनानुमानदीपाः,
कुणपकुतपावापचापशूर्पाः ॥ १०७

स्तूपोडुपौ विटपमण्डपशष्पवाष्प-
द्वीपानि विष्टपनिपौ शफडिम्बबिम्बाः ।
जम्भः कुसुम्भककुभौ कलभो निभोऽर्म-
संक्रामसंक्रमललामहिमानि हेमम् ॥ १०८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्यमकामोद्यामाश्रमकुट्टिमकुसुमसंगमा गुल्मः ।
क्षेमक्षौमौ कम्बलिवाह्यो मैरेयतूर्यौ च ॥ १०९

पूयाऽजन्यप्रमयसमया राजसूयो हिरण्या-
रण्ये संख्यं मलयवलयौ वाजपेयः कषायः ।
शल्यं कुल्याव्ययकवियवद्रोमयं पारिहार्यः,
पारावारातिखरशिखरक्षेत्रवस्त्रोपवस्त्राः ॥ ११०

अलिंजरः कूबरकूरबेरनीहारहिञ्जीरसहस्रमेंद्राः ।
संसारसीरौ तुवरश्च सूत्रशृङ्गारपद्मान्तवक्त्रकर्णपूराः ॥ १११

नेत्रं वक्त्रपवित्रपत्रसमरौशीरान्धकारा वरः,
केदारप्रवरौ कुलीरशिशिरावाडम्बरो गह्वरः ।
क्षीरं कोटरचक्रचुक्रतिमिराङ्गारास्तुषारः शरो,
आष्ट्रोपह्वरराष्ट्रतक्रजठरार्द्राः कुञ्जरः पञ्जरः ॥११२

कर्पूरनूपुरकुटीरविहारवार-
कान्तारतोमरदुरोदरवासराणि ।
कासारकेसरकरीरशरीरजीर-
मञ्जीरशोखरयुगंधरवज्रवभ्राः ॥ ११३

आलवालपलभालपलालाः, पल्वलः खलचषालविशालाः ।
शूलमूलमुकुलास्तलतैलौ, तूलकुड्मलतमालकपालाः ११४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कवलप्रवालबलशम्बलोत्पलो-
पलशीलशैलशकलाङ्कुलाश्चलाः ।
कमलं मलं मुशलशालकुण्डलाः,
कललं नलं निगलनीलमङ्गलाः ॥ ११५

काकोलहलाहलौ हलं, कोलाहलकङ्कालवल्कलाः ।
सौवर्चलधूमले फलं, हालाहलजम्बालखण्डलाः ॥ ११६

लाङ्गूलगरलाविन्द्रनीलगाण्डीवगाण्डिवाः ।
उल्वः पारशवः पार्श्वापूर्वत्रिदिवताण्डवाः ॥ ११७

निष्ठेवः प्रग्रीवः शरावरावौ भावक्लीवशवानि ।
दैवः पूर्वः पल्लवनल्वौ, पाशं कुलिशं कर्कशकोशौ ११८

आकाशकाशकणिशाङ्कुशशेषवेषो-
ष्णीषाम्बरीषविषरोहिषमाषमेषाः ।
प्रत्यूषयूषमथ कोषकरीषकर्ष-
वर्षामिषा रसबुसेक्षसचिक्षसाश्च ॥ ११९

कर्पास आसो दिवसावतंसवीतंसमांसाः पनसोपवासौ ।
निर्यासमासौ चमसांसकांसस्नेहानि बर्हो गृहगेहलोहाः १२०

पुण्याहदेहौ पटहस्तनूरुहो,
लक्षोऽररिस्थाणुकमण्डलूनि च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाटुश्चटुर्जन्तुकशिप्वणुस्तथा,
जीवातु कुस्तुम्बरु जानु सानु च ॥ १२१
कम्बुः सक्तुर्दार्वगुरुर्वास्तु पलाण्डु-
र्हिङ्गुः शिग्रुर्दौस्तितउः सीध्वथ भूम ।
वेम प्रेम ब्रह्म गरुल्लोम विहायः,
कर्माष्ठीवत्पक्ष्मधनुर्नाममहिम्नी ॥ १२२

इति पुंनपुंसकलिङ्गाः ।

स्त्रीक्लीबयोर्नखं शुक्तौ, विध्वं मधुकमौषधे,
माने लक्षं मधौ कल्यं, क्रोडोऽङ्के तिन्दुकं फले ॥
तरलं यवाग्वां पुष्पे, पाटलं पटलं चये ।
वसन्ततिलकं वृत्ते, कपालं भिक्षुभाजने ॥ १२३
अर्धपूर्वपदो नावष्टम्भकर्त्रनटौ क्वचित् ।
चौराद्यमनोज्ञाद्यकञ्, कथानककशेरुके ॥ १२४
वंशिकवक्त्रौष्ठिककन्यकुब्जपीठानि नक्तमवहित्थम् ।
रशनं रसनाच्छोटनशुम्बं, तुम्बं महोदयं कांस्यम् ॥ १२५
मृगव्यचव्ये च वणिज्यवीर्यनासीरगात्रापरमन्दिराणि ।
तमिस्रशस्त्रे नगरं मसूरत्वक्क्षीरकादम्बरकाहलानि ॥ १२६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थालीकदल्यौ स्थलजालपित्तला-
गोलायुगल्यो बडिशं च छर्दि च ।
अलाबु जम्बूद्रुषः सरः सदो,
रोदोऽर्चिषी दाम गुणे त्वयट् तयट् ॥ १२७

इति स्त्रीनपुंसकलिङ्गाः ।

खतल्लिलिङ्गः सरकोऽनुतर्षे शललः शले ।
करकोऽब्दोपले कोशः, शिम्बा खड्गपिधानयोः ॥ १२८
जीवः प्राणेषु केदारे, वलजः पवने खलः ।
बहुलं वृत्तनक्षत्रपुराद्याभरणाभिधाः ॥ १२९
भल्लातक आमलको, हरीतकबिभीतकौ ।
तारकाढकपिटकस्फुलिङ्गा विडङ्गतटौ १३०
पटः पुटो वटो वाटः, कपाटशकटौ कटः ।
पेटो मठः कुण्डनीडविषाणास्तूणकङ्कतौ ॥ १३१
मुस्तः कुथेङ्गुदजृम्भदाडिमाः, पिठरप्रतिसरपात्रकंदराः ।
नखरो वल्करो दरः पुरश्छत्रः कुवलमृणालमण्डलाः १३२
नालप्रणालपटलार्गलशृङ्खलकन्दलाः ।
पूलावहेलौ कलशकटाहौ षष्टिरेण्विषु ॥ १३३

इति खतल्लिलिङ्गाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परलिङ्गो द्वन्द्वोऽशी ङेऽर्थो वाच्यवदपत्यमिति नियताः ।
अस्थ्यारोपाभावे गुणवृत्तेराश्रयाद्वचनलिङ्गे ॥ १३४

प्रकृतेर्लिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित् ।
प्रकृतिर्हरीतक्यादिर्न लिङ्गमतिवर्तते ॥ १३५

वचनं तु स्खलतिकादिर्बह्वर्थाऽत्येति पूर्वपदभूता ।
स्त्रीपुंनपुंसकानां सह वचने स्यात् परं लिङ्गम् ॥ १३६

नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः ।
पदं वाक्यमव्ययं चेत्यसंख्यं च तद्बहुलम् ॥ १३७

निःशेषनामलिङ्गानुशासनान्यभिसमीक्ष्य संक्षेपात् ।
आचार्यहेमचन्द्रः समदभदनुशासनानि लिङ्गानाम् ॥ १३८

इत्याचार्यश्रीहेमचन्द्रविरचितं लिङ्गानुशासनं समाप्तम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकाक्षरकोशः ।

अकारो वासुदेवः स्या**दा**कारस्तु पितामहः ।
पूजायामपि माङ्गल्ये आकारश्च प्रकीर्तितः ॥ १ ॥
इकार उच्यते कामो लक्ष्मी**री**कार उच्यते ।
उकारः शङ्करः प्रोक्त ऊकारश्चापि लक्षणे ॥ २ ॥
रक्षणे चापि ऊकार **ऊ**कारो ब्रह्मणि स्मृतः ।
ऋकारो वेदमाता स्याद्दकारो दनुजप्रसूः ॥ ३ ॥
ॠकारो देवजातीनां माता सद्भिः प्रकीर्तिता ।
ऌकारः स्मर्यते पूर्वैर्जननी शब्दकोविदैः ॥ ४ ॥
एकार उच्यते विष्णु**रै**कारः स्यान्महेश्वरः ।
ओकारस्तु भवेद्ब्रह्मा **औ**कारोऽनन्त उच्यते ॥ ५ ॥
अं स्याच्च परमं ब्रह्म **अः** स्याच्चैव महेश्वरः ।
कः प्रजापतिरुद्दिष्टः **को**ऽर्कवाय्वनलेषु च ॥ ६ ॥
कश्चात्मनि मयूरे च **कः** प्रकाश उदाहृतः ।
कं शिरो जलमाख्यातं **कं** सुखं च प्रकीर्तितम् ॥७॥
पृथिव्यां **कुः** समाख्यातः **कुः** शब्देऽपि प्रकीर्तितः ।
खमिन्द्रिये **ख**माकाशे **खः** स्वर्गेऽपि प्रकीर्तितः ॥८॥
सामान्ये च तथा शून्ये **ख**शब्दः परिकीर्तितः ।
गो गणेशः समुद्दिष्टो गन्धर्वो **गः** प्रकीर्तितः ॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गं गीतं **गा** च गाथा स्याद्गौश्च धेनुः सरस्वती ।
घा घण्टाथ समाख्याता **घो** घनश्च प्रकीर्तितः ॥१०॥
घो घण्टाहननेऽधर्मे कुर्घोणा घूर्घ्वनापि ।
ङकारो भैरवः ख्यातो **ङ** कारो विषयस्पृहा ॥११॥
चश्चन्द्रमाः समाख्यातो भास्करे तस्करे मतः ।
निर्मलं **छं** समाख्यातं तरले **छ**ः प्रकीर्तितः ॥१२॥
छेदके **छ**ः समाख्यातो विद्वद्भिः शब्दकोविदैः ।
जकारो गायने प्रोक्तो जेमने **ज**ः प्रकीर्तितः ॥१३॥
जेता **ज**श्च प्रकथितः सूरिभिः शब्दशासने ।
स्वो **झ**कारः कथितो नष्टे **झ**श्चोच्यते बुधैः ॥१४॥
झकारश्च तथा वायौ नेपथ्ये समुदाहृतः ।
ञकारो गायने प्रोक्तो **ञ**कारो झर्झरध्वनौ ॥१५॥
टो धरित्र्यां च करके **टो** ध्वनौ च प्रकीर्तितः ।
ठकारो जनतायां स्याट्ठो ध्वनौ च शठेऽपि च ॥१६॥
ठो महेशः समाख्यातश्च शून्ये प्रकीर्तितः ।
बृहद्ध्वनौ च ठः प्रोक्तस्तथा चन्द्रस्य मण्डले ॥१७॥
डकारः शङ्करे त्रासे ध्वनौ भीमे निरुच्यते ।
ढकारः कीर्तिता ढक्का निर्गुणे निर्धने मतः ॥१८॥
णकारः सूकरे ज्ञाने निश्चये निर्णयेऽपि च ।
तकारः कीर्तितश्चौरे क्रोडपुच्छे प्रकीर्तितः ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिलोच्चये **थ**कारः स्यात्थकारो नयरक्षणे ।
दकारोऽग्रे कलत्रे च छेदे दाने च दातरि ॥२०॥
धं धने सधने **धः** स्याद्विधातरि मनाषपि ।
धिषणा **धीः** समाख्याता धूश्चैवं भारचित्तयोः ॥२१॥
नेता **न**श्च समाख्यातस्तरणौ **नः** प्रकीर्तितः ।
नकारः सौगते बुद्धौ स्तुतौ वृक्षे प्रकीर्तितः ॥२२॥
नशब्दः स्वागते बन्धौ वृक्षे सूर्ये च कीर्तितः ।
पः कुबेरः समाख्यातः पश्चिमे च प्रकीर्तितः ॥२३॥
पवने **पः** समाख्यातः **पः** स्यात्पाने च पातरि ।
कफे वारे **फ**कारः स्यात्तथाऽऽह्वाने प्रकीर्तितः ॥२४॥
फूत्कारेपि च **फः** प्रोक्तस्तथा निष्फलभाषणे ।
बकारो वरुणः प्रोक्तः कलशे **बः** फलेऽपि च ॥२५॥
वक्षःस्थले च **बः** प्रोक्तो गदायां समुदाहृतः ।
नक्षत्रे **भं** बुधाः प्राहुर्भवने **भः** प्रकीर्तितः ॥२६॥
दीप्तिर्**भा** स्याच्च **भू**र्भूमिर्**भी**र्भयं कथितं बुधैः ।
मः शिवश्चन्द्रमा वेधा **मा** लक्ष्मीश्च प्रकीर्तितः ॥२७॥
मा च मातरि माने च बन्धने **मः** प्रकीर्तितः ।
यशो **यः** कथितः प्राज्ञैर्यो वायुरिति शब्दितः ॥२८॥
याने यातरि **यस्त्या**गे कथितः शब्दवेदिभिः ।
रश्च रामेऽनिले वह्नौ भूमावपि धनेऽपि च ॥२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इन्द्रियेन्धनरोगे च रुर्भवे च प्रकीर्तितः ।
लो दीप्तौ द्यां **लश्च** भूमौ भये चाह्लादनेऽपि च ॥३०॥
लो वाते लवणे च स्या**ल्लो** दाने च प्रकीर्तितः ।
लः श्लेषे चाशये चैव प्रलये साधनेऽपि लः ॥ ३१ ॥
मानसे वरुणे चैव लकारः सान्त्वनेऽपि च ।
विश्च पक्षी निगदितो गगनं परिकीर्तितम् ॥ ३२ ॥
शं सुखं शंकरः श्रेयः **शश्च** सीम्नि निगद्यते ।
शयने **शः** समाख्यातो हिंसायां शो निगद्यते ॥३३॥
षः कीर्तितो बुधैः श्रेष्ठे **षश्च** गम्भीरलोचने ।
उपसर्गे परोक्षे च **ष**कारः परिकीर्तितः ॥ ३४ ॥
सः कोपे वरणे **सः** स्यात्तथा शूलिनि कीर्तितः ।
सा च लक्ष्मीर्बुधैः प्रोक्ता गौरी **सा** च **स** ईश्वरः ३५
हः कोपे वारणे **ह**श्च तथा शूली प्रकीर्तितः ।
हिः पद्मावरणे प्रोक्तो **हिः** स्याद्धेत्ववधारणे ॥३६॥
क्षः क्षेत्रे वक्षसि प्रोक्तो बुधैः **क्षः** शब्दशासने ।
क्षिः क्षेत्रे क्षत्ररक्षे च नृसिंहे च प्रकीर्तितः ॥३७॥
आगमेभ्योऽभिधानेभ्यो धातुभ्यः शब्दशासनात् ।
एवमेकाक्षरं नामाभिधानं रचितं मया ॥ ३८ ॥

इत्येकाक्षरकोशः समाप्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीः ।

श्रीपुरुषोत्तमदेवप्रणीतः कोशः

शब्दभेदप्रकाशः ।

॥ श्रीगणेशाय नमः ॥

प्रबोधमाधातुमशाब्दिकानां
कृपामुपेत्याविशतां कवीनाम् ।
कृतो मया रूपमवाप्य शब्द-
भेदप्रकाशोऽखिलवाङ्मयार्थः ॥ १ ॥

विन्ध्यादगारमागारमपगामापगामपि ।
अरातिमारातिमथो अम आमः प्रकीर्तितः ॥ २ ॥
भवेदमर्ष आमर्षोऽप्यङ्कुरोऽङ्कूर एव च ।
अन्तरिक्षमन्तरीक्षमगस्त्योऽगस्तिरेव च ॥ ३ ॥
अटरूषश्चाटरूषोऽप्यवस्योऽवश्य एव च ।
प्रतिश्यायः प्रतीश्यायो भल्लूको भल्लुकोऽपि च ॥४॥
उल्लूकमुल्लुकं प्राहुः शम्बूकमपि शम्बुकम् ।
जतुका स्याज्जतूकापि मयूरो मयुरो मतः ॥ ५ ॥
वास्तुकं चापि वास्तूकं देवकी दैवकीति च ।
ज्योतिषं ज्यौतिषं चापि जीवनं जीवनं तथा ॥ ६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रामापि च सुत्रामा हनूमान्हनुमानपि ।
दुषणं स्यादूषणं च भवेदुषरमूषरम् ॥ ७ ॥
बन्धूरं बन्धुरं च स्यादूरीकृतमुरीकृतम् ।
वाह्लीकं वाह्लिकं चापि गाण्डीवं गाण्डिवं तथा ॥ ८ ॥
उषाप्यूषा ननन्दा च ननान्दापि प्रकीर्तिता ।
चाण्डालोऽपि च चण्डालो वादान्योऽपि वदान्यवत्॥९॥
हालाहलं हालहलं वदन्त्यपि हलाहलम् ।
हल्लालं च हलालं च हाहलं च प्रचक्षते ॥ १० ॥
प्रक्काणः प्रक्कणश्चापि श्यामाकः श्यामकोऽपि च ।
साहचरः सहचरः स्फाटिकं स्फटिकं तथा ॥ ११ ॥
गन्धर्वोऽपि च गान्धर्वश्चमरश्चामरस्तथा ।
चोरश्चौरश्चटुश्चाटुश्चोलं चेलं चमुश्चमूः ॥ १२ ॥
चञ्चुश्चञ्चूस्तलस्तालः श्यामलः स्यामलस्तथा ।
धान्याकमपि धन्याकं युतकं यौतकं तथा ॥ १३ ॥
कवाटं च कपाटं च कविलं कपिलं तथा ।
करवालः करपालोऽवनीपकवनीपकौ ॥ १४ ॥
पारावतः पारवतो जरा स्याज्जरसा सह ।
जटायुषा जटायुश्च विन्ध्यादायुस्तथाऽऽयुषा ॥ १५ ॥
सायं सायो भवेत्कोशः कोषः शण्डश्च षण्डवत् ।
भाविकं भविकं चापि मुषलं मुसलं तथा ॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेशो वेषश्च कथितो बुधोऽपि स्याद्बुसस्तथा ।
स्याद्धनुर्धनुषा सार्धं जरसा च जरां विदुः ॥ १७ ॥
सूकरः शूकरोऽपि स्यात्सृगालश्च शृगालवत् ।
सूरः शूरश्च कथितः कलसः कलशोऽपि च ।
तनुश्च तनुषा सार्धं धनुना च धनुर्विदुः ॥ १८ ॥
सुनासीरः शुनासीरो नारायणनरायणौ ।
यातुधानो जातुधानो लक्षणो लक्ष्मणोऽपि च ॥१९॥
श्वशुरः स्वसुरोऽपि स्याच्चरित्रं चरितं तथा ।
पारदं पारतं वासा वासकः कृमिणः कृमिः ॥ २० ॥
त्रिफला त्रिफलं चापि कुसरा किशरापि च ।
भवेद्दृष्टिस्तथा विष्टिः प्रियालः स्यात्पियालवत् ॥२१॥
कलाटिनः कलादीनो बलिशो बडिशोऽपि च ।
संकरः शंकरोऽपि स्यान्मद्गलो मुद्गलोऽपि च ॥२२॥
मुद्गरो मद्गुरश्चापि मकुटं मुकुटं त्विह ।
सुकृतं सूकृतं चापि चुल्लकं चूल्लकं तथा ॥ २३ ॥
करजः कुरजोऽपि स्यात्परेतः प्रेत उच्यते ।
किर्मीरोऽपि च कर्मीरो हायनं हयनं स्मृतम् ॥ २४ ॥
शौण्डीयमपि शौण्डीरं ज्येष्ठे ज्यैष्ठोऽपि दृश्यते ।
सौदामनी च सुदामनी च सौदामन्यपि दृश्यते ॥२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जरठो जठरोऽपि स्यान्निमेषो निमिषोऽपि च ।
बुक्को बकश्च कुसुमे मदनो मलयो द्रुमे ॥ २६ ॥
आराग्वधारग्वधौ च खुरकक्षुरकावपि ।
पृष्णिः पृश्निश्च सरयूः सरयुश्च निगद्यते ॥ २७ ॥
नीलङ्गुरपि नीलाङ्गुरीश्वरी चेश्वरापि च ।
तापिञ्छमपि तापिञ्छं त्रपुषं त्रापुषं तथा ॥ २८ ॥
डिण्डिरोऽपि च डिण्डीरः परशं पर्शुना सह ।
वालुका वालिका चापि दोर्दोषापि भुजा भुजः ॥२९॥
बाहुर्बाहा तृषा तृष्णा संध्या स्यात्संधिना सह ।
भगिनीमपि भग्नीं च झल्लरीं जल्लरीं विदुः ॥ ३० ॥
वेत्रं च वेतसा सार्धमेधमाहुस्तथैधसा ।
संवलनं संवरणं तलुनी तरुणी तथा ॥ ३१ ॥
प्रमदावनं प्रमदवनं प्रवणं परिकीर्तितम् ।
खरूलिका खुरलिका वज्रं वज्रोऽशनिस्तथा ॥ ३२ ॥
शिलमुञ्छं शिलोञ्छं च भवेदुञ्छशिलं तथा ।
आशिराश्याऽहिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरेः प्रिया ॥३३॥
कुमुदं कुमुदश्चापि योषित् स्याद्योषिता सह ।
तमस्तु तमसा प्रोक्तं रजसापि रजः समम् ॥ ३४ ॥
जलूकास्तु जलौकाभिः कथितोऽयं जलौकसः ।
दिवा दिवं च कथितं पर्षः स्यात्पर्षदा सह ॥३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षाः स्युर्वरिषाभिस्तु हविषापि हविष[illegible]
सर्षपः स्यात्सरिषपः कर्षः स्यात्करिषेण च ॥ ३६ ॥
मारिषो मर्ष इत्युक्तः परशुः पर्श एव च ।
हारितो हरितोऽपि स्यान्मुनिपक्षिविशेषयोः ॥ ३७ ॥
तुवरस्तूवरोऽपि स्यात्कुवरः कूवरस्तथा ।
उत्तमोऽनुत्तमोऽपि स्यादाहतं स्यादनाहतम् ॥ ३८ ॥
उदारे चानुदारः स्यादुदग्रे चानुदग्रवत् ।
कोंकोणः कोंकणश्चापि मिहिरो महिरस्तथा ॥ ३९ ॥
महिलायां महेलापि महला स्यान्महेलिका ।
छेदश्छेकश्च छेकालो विदग्धे छेकिलोऽपि च ॥४०॥
गूगुलो गुग्गुलोऽपि स्याद्धिङ्गूले चापि हिङ्गुलम् ।
मन्दिरे मन्दिरापि स्याद्वीर्ये वीर्यापि कथ्यते ॥ ४१ ॥
भुक्तेऽप्यवालं चावालमुदके स्यादुदं समम् ।
दुष्टभेदे शतरुषः शतारुश्च निगद्यते ॥ ४२ ॥
द्रेक्कद्रेक्काणद्रक्काणा भवन्त्यपि दकाणवत् ।
पत्राङ्कमपि पत्राङ्के कुद्दालश्च कुदालवत् ॥ ४३ ॥
मारुषं मारिषं शाके प्रीहा ह्रीहा गदेऽपि च ।
फेणाफेणिस्तथाख्यादौ करिण्यां कारिणीति च ॥४४॥
धरित्री धारयित्री च तरीषी तारषी तथा ।
कन्याकुब्जं कान्यकुब्जं कोशलोत्तरकोशला ॥ ४५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाराणसीत्यपि प्रोक्ता वारणासी वराणसी ।
ताम्रलिप्ता दामलिप्ता तुङ्गोऽप्युत्तुङ्ग इत्यपि ॥ ४६ ॥
अन्तस्थीययकारश्च पवनस्य तु कथ्यते ।
तन्नवायस्य वायेऽपि तत्रादित्वं च दृश्यते ॥ ४७ ॥
एवमन्येऽपि चार्हादावूह्या वर्णप्रयोगतः ।
मूर्धरेफादयो ज्ञेयाश्छन्दोभङ्गभयादिह ॥ ४८ ॥
छन्दावभिप्रायवशौ कलजः स्यात्कलाजवत् ।
ह्रस्वादिरपि पीडायां धनुःकोट्यामपीष्यते ॥ ४९ ॥
एतौ मध्यत्वगीयौ वैडूर्यमणिशाद्वलौ ।
तालव्यमध्यो विशद ऊर्ध्वशब्दो वकारवान् ॥ ५० ॥
यावन्यां च भवान्यां च श्रावणे मासि मध्यवः ।
शफे खुरं कवर्गीयं क्षकारश्च क्षुरमके ॥ ५१ ॥
नापितस्योपकरणे कषसंयोग इष्यते ।
अव्ययान्यव्ययं शत्रौ दोषाशब्दः प्रचक्षते ॥ ५२ ॥

प्रायो भवेयुः प्रचुरप्रयोगाः
सामान्यकोदाहरणे प्रतीताः ।
रूपादिभेदेषु विचारणेषु
विचक्षणो निश्चयतामुपैति ॥ ५३ ॥

कचिन्मात्राकृतो भेदः कचिद्वर्णकृतोऽत्र च ।
कचिदर्थान्तरोल्लेखाच्छब्दानां रूढितः कचित् ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जागर्ति यस्यैष मनःसरोजे
स एव शब्दार्थविवर्तनेशः ।
निजप्रयोगार्पितकामचारः
परप्रयोगार्थविशारदश्च ॥ ५५ ॥

इति पुरुषोत्तमदेवकृतः शब्दभेदप्रकाशः समाप्तः ॥

उदयानन्द अर्ज्यालोपाध्यायस्येदं पुस्तकं परार्थम् ।

श्रीमत्सुधाकलशमुनिपुङ्गवप्रणीता

॥ श्रीएकाक्षरनाममाला ॥

श्रीवर्धमानमानम्य सर्वातिशयसुन्दरम् ।
एकाक्षरनाममालां कीर्तयामि यथाश्रुतम् ॥ १ ॥
अः पुंलिङ्गशार्ङ्गधारिण्यः स्वल्पोऽर्थेऽव्ययः पुनः ।
विरिञ्चावाश्च पुलिङ्ग **आ** वाक्ये स्मरणेऽव्ययः ॥ २ ॥
आः संतापेऽव्ययः क्रुध्यामव्ययोऽप्यधृतौ स्मृतौ ।
इ कामे पुंलिङ्ग **इ** चाव्ययः कोपोक्तिखेदयोः ॥ ३ ॥
ईः पद्मायामव्ययस्त्वी प्रत्यक्षे दुःखभावने ।
प्रकोपे संनिधौ चैव पुलिङ्ग **उ** र्वृषध्वजे ॥ ४ ॥
रोषोक्तौ मरणेऽप्यर्थेऽव्यय **ऊं** त्वव्ययस्तथा ।
प्रश्ने चाङ्गीकृते रोषे पुंलिङ्ग **ऊ**स्तु रक्षणे ॥ ५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊमव्ययः प्रकर्षोक्तौ प्रश्ने **ऋ**र्देवमातरि ।
अव्यय **ऋ** तु कुत्सायां वचनेऽपि तथैवच ॥ ६ ॥
ऋस्त्वजे दानवाञ्छायां **ऋ**श्च स्याद्देवमातरि ।
ऋर्वाराह्यां भवेदेस्तु विष्णावैस्तु वृषध्वजे ॥ ७ ॥
ओरूर्ध्वलिङ्ग आहूतावव्ययः स्यादनन्त **ओ** ।
संबोधने चाव्यय **ओ** परब्रह्मण्य**मः** शिवे ॥ ८ ॥
कः सूर्यमित्रवाय्वग्निब्रह्मात्मयमकेकिषु ।
प्रकाशवक्त्रयोश्चापि **कं** नीरसुखमूर्धसु ॥ ९ ॥
कुर्भूकुत्सितशब्देषु पापीयसि निवारणे ।
ईषदर्थे च किंशब्दः कुत्सने क्षेपप्रश्नयोः ॥ १० ॥
वितर्काश्चर्यनिन्दासु **किं**शब्दः स्यात् कियानपि ।
खमिन्द्रियस्वर्गशून्यभूषाकाशसुखेषु च ॥ ११ ॥
संविदि शून्यखण्डे च वर्तते **ख**श्च भास्करे ।
गो गन्धर्वे गणेशे च गीते **गं** ग**श्च** गातरि ॥१२॥
गौर्वाणीबाणभूरश्मिवज्रस्वर्गाक्षिवारिषु ।
दिशि धेनौ श्रुतेश्चर्या गणेशे चापि **गौः** स्मृतः ॥१३॥
घः कुम्भे हनने घोषान्तर्भावकिङ्किणीष्वपि ।
ङो विषये भैरवे च **च**स्तरौ चन्द्रचौरयोः ॥ १४ ॥
चुश्चकोरे समाख्यातश्चकारः पुनरव्ययः ।
अन्योऽन्यार्थे विकल्पार्थे समासे पादपूरणे ॥ १५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पक्षान्तरे समूहार्थे हेतावववृतावपि ।
अन्वाचये तथा तुल्ययोगितायां च कीर्तितः ॥१६॥
छः सूर्ये छेदके ख्यातस्तथा संवरणे भवेत् ।
छश्च छन्दसि तडिति निर्मले च तथा स्मृतः ॥१७॥
जश्च जेतरि जनने विगते **जिस्तु** जेतरि ।
जूर्विहायसि जवने पिशाच्यां विगतेऽपि च ॥ १८॥
झो नक्तं गायने नष्टे घर्घरध्वनिनामनि ।
चारुवाक्चारयो**र्झ**स्तु व्यूहने गूढरूपके ॥ १९ ॥
टः पृथिव्यां ध्वनौ वायौ **करे टं** पुनर्भुवि ।
चकोरेऽब्दे तथा **ठ**स्तु घटे शून्ये बृहद्ध्वनौ ॥ २० ॥
चन्द्रस्य मण्डले रुद्रे **डो** वृषाङ्के ध्वनावपि ।
बन्दिवृन्दे तथा **ड**ः स्यात् यामिनीपतिमण्डले ॥ २१ ॥
ढो ढक्कायां समाख्यातस्तथा **ढा** निर्गुणे ध्वनौ ।
णः प्रकटे निष्कले च प्रस्तुते ज्ञानबन्धयोः ॥२२॥
तकारस्तस्करे युद्धे क्रोडे पृच्छे च **ता** श्रियाम् ।
तु स्यात्पूर्वे निवृत्तौ च पूर्वस्मादवधारणे ॥ २३ ॥
विलक्षणे विकल्पार्थे **थो** भवेद्भयरक्षणे ।
भूधरे च तथा भारे **दो** दाने दायकेऽपि च ॥२४॥
दाने दातरि **दा** केचिद्विदुर्दा छेदबन्धयोः ।
दं कलत्रं तथा **धश्च** धीरे च धनदे धने ॥ २५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घस्तु चित्रेऽश्ववारे च **घी**र्बुद्धाविषुधावपि ।
गुच्छकेशे विरिञ्चौ **धा** तथा धूर्मारकम्पयोः ॥ २६ ॥
धूते धुराकम्पने च **नो** बुद्धौ ज्ञानबन्धयोः ।
अस्मानस्मभ्यमस्माकमेषां स्थाने भवेच्च नः ॥ २७ ॥
निषेधार्थेऽव्यये नो च **न**कारश्च नरस्तु **ना** ।
निःश्रुते नेतरि ख्यातो **नुः** स्तुतौ च प्रकीर्तितः ॥२८॥
निः स्यात् क्षेपे च नित्यार्थे भृशार्थाश्रयराशिषु ।
कौशले बन्धने मोक्षे संशये दारुकर्मणि ॥ २९ ॥
अधोभावोपरमयोः सन्निधानेऽव्ययो मतः ।
नुः प्रश्ने च वितर्के च विकल्पेऽनुशयेऽव्ययः ॥ ३० ॥
तरण्यां **नौ**स्तथा ख्यातः **पः** पाने पवने पथि ।
प्रौढे च वर्णके पश्च **पा** पातरि तथा श्रुते ॥ ३१ ॥
फकारो निष्फले जल्पे पुष्करे भयरक्षणे ।
फं फा वाते फले फेने फूत्कारे **फू**स्तथोदितः ॥३२॥
बः कुम्भे वरुणे पद्मे कलहे विगतौ तथा ।
भश्चालिशुक्रयोर्भावे **भश्च** दीप्तौ भये तु **भीः** ॥३३॥
भं धिष्ण्ये भूर्भुवि स्थाने **म**श्चन्द्रे च विधौ शिवे ।
मौलौ च बन्धने मूः स्यान्मा माने मारणेऽव्ययः ॥३४॥
असच्छब्दे द्वितीयायां **मा** च षष्ठ्यां च **मे** पुनः ।
मा मातरि तथा लक्ष्म्यां **यस्तु** वाते यमेऽपि च ॥३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यश्च घातरि सूर्ये स्वाधा जाने धातरि विधाने ।
खट्वाङ्गेऽपि च रः कामे तीक्ष्णे वैश्वानरे नरे ॥३६॥
रामे वज्रे च शब्दे स्याद् रा द्रव्ये कनके पुनः ।
आश्रये नीरदे च स्याद् रुः सूर्ये रक्षणेऽपि च ॥३७॥

भये शब्दे च री भ्रान्तौ लकारश्चलने पुनः ।
ला दाने लूश्च लवने लश्च लूश्च विडौजसि ॥३८॥
लक्ष्मामृते दिशायां च लीः श्लेषे वलये तथा ।
वो वाते वरुणे रुद्रे सान्त्वने चाव्ययः पुनः ॥३९॥

एवार्थे उपमाने च विकल्पे च समुच्चये ।
विः श्रेष्ठे भीते नानार्थे वै हेतौ पादपूरणे ॥ ४० ॥
द्वितीयायाश्चतुर्थ्याश्च षष्ठ्या युष्मद्भुहुत्वके ।
वश्चासां च विभक्तीनां द्वित्वे वां कथितो बुधैः ॥४१॥

आकाशे विहगे विश्वे शं श्रेयसि सुखेऽव्ययः ।
शस्तु शान्ते च साक्षायां शीः शये हिंसनेऽपि ॥४२॥

शुश्चन्द्रे षः सदारः स्यात्तथेष्टे प्रसवे तु षूः ।
सः सूर्ये च परोक्षे च सं सङ्गोचेऽव्ययस्तु सम् ॥४३॥

संगार्थे शोभनार्थे च प्रकृष्टार्थसमर्थयोः ।
प्रथमान्तस्तदः स्थाने स्मृतौ लक्ष्म्यां च सोच्यते ॥४४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रः शूलिनि करे नीरे क्रोधे गर्भप्रभाषणे ।
निवासेऽथाव्ययो **ह्रः** स्यात्संबुद्धौ पादपूरणे ॥ ४५ ॥

अव्ययो **ह्रा** स्मृतः शोके तथा दुःखविषादयोः ।
हि हेतौ पादपूर्तौ च विशेषे चावधारणे ॥ ४६ ॥

स्फटे दानेऽथाव्ययो **ह्री** दुःखहेतौ च विस्मये ॥
विषादे चाव्ययो **ह्रं** तु नये काये च भाषणे ॥ ४७ ॥

हुमव्ययः परिप्रश्ने वितर्के वचने तु **ह्रौ** ।
हे कुत्सायां तथा हेतौ हूतौ संबोधने तु **ह्रौ** ॥ ४८ ॥

राक्षसे क्षस्तथा क्षेत्रे शब्दा ये व्यक्षरादयः ।
स्वरान्ता व्यञ्जनान्ताश्च ज्ञेया ग्रन्थान्तरात्तु ते ॥ ४९ ॥

मलधारिगच्छभर्तुः सूरेः श्रीराजशेखरस्य गुरोः ।
शिष्यः **सुधाकलश** इत्येकाक्षरनाममालिकामतनोत्५०

इति एकाक्षरनाममाला समाप्ता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org